वर्षम् 72
अङ्कः -05
फाल्गुनमासः
विक्रमाब्दः 2078
युगाब्दः 5123
मार्च, 2022


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



पूज्यते फाल्गुने मासि शिवरात्रिमहोत्सवे।
मृत्युञ्जयो महादेवो वरदायी सदाशिवः।।

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ५ |
| ३ | डॉ. हरिरामाचार्यप्रणीतमधुच्छन्दाकाव्ये अलङ्कारविमर्शः | डॉ. ललितकिशोरशर्मा | ९ |
| ४ | श्रीरामदूताष्टकम् | पं. नथमलशास्त्री दाधीचः | १७ |
| ५ | ज्ञानिभक्तकृतश्रीविष्णुस्तोत्राणि | सुमनलता सैनी | १८ |
| ६ | छन्दोबद्धगज़लकाव्यस्तबकः | डॉ. हर्षदेवमाधवः | २४ |
| ७ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २५ |
| ८ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २७ |
| ९ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |
| १० | संस्कृत-समाचाराः | | ३५ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठ, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका:

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णाकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -05
फाल्गुनमासः
विक्रमाब्दः 2078
युगाब्दः 5123
मार्च, 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# सर्वसेव्यः सदाशिवः

...✍ प्रोफेसर श्रीकृष्णशर्मा

अथर्वशिखोपनिषत् प्रमुखा श्रुतिः। '**कश्च ध्येयः**' इति तत्र प्रथमपरिच्छेदे जिज्ञासावाक्यांशः। '**ध्यायीतेशानं प्रध्यायितव्यम्**' 'कारणन्तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरश्च शम्भुः' 'शिव एको ध्येयः शिवशङ्कर' इत्यादिरूपेण समाधानवाक्यकदम्बः।

**ईशानो**ऽर्थात् परमशिवोऽनन्यभावेन भजनीयः यतो ब्रह्मा-विष्णु-रुद्रेन्द्रास्ते परमशिवस्यांशभूताः, परमशिवस्तु अंशी।'शिव''ईशान' शब्दौ समानार्थकौ।

**'शिव' शब्द-निर्वचनम्** - इच्छार्थक - 'वशि' धातोर्वर्णव्यत्ययेन 'शिवः' सिद्धः। यथोक्तम् तैत्तिरीयसंहितायाम् (1.8.8) -

**'हिंसि धातोः सिंहशब्दो वशि कान्तौ शिवः स्मृतः। वर्णव्यत्ययतः सिद्धः पश्यकः कश्यपो यथा।।' इति।**

वष्टि सर्वकल्याणमिति यावत्। अपरथाऽपि 'शिव' शब्दनिरुक्तिः। यथा- शिवः कल्याणगुणनिकरोऽस्य, अस्मिन् वेत्यर्थे 'अर्श आदिभ्योऽच्' (पा. 5.2.127) इत्यनेन 'अच्'- प्रत्ययान्तः। अत्र वायुपुराणवचनम् -

**'अथवाऽनन्तकल्याणगुणैकनिधिरीश्वरः। शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः।।'इति।**

**'ईशान' शब्दव्युत्पत्तिः** - अदादिगणीय-सामर्थ्यार्थक-'ईश' धातोः 'ईशान' शब्दः। ईष्टे तच्छील इत्यर्थे 'ताच्छील्यवयोवचनशक्तिषु' (पा. 3.2.129) इति सूत्रेण 'चानश्' प्रत्ययान्त 'ईशान' शब्दो व्युत्पत्त्या स्वाभाविक-निरतिशय-ऐश्वर्यपरः। अत्र 'चानश्' प्रत्ययस्ताच्छील्य= तत्स्वभावताऽर्थे ज्ञेयः।

रूढिशक्त्या तु 'ईशान' शब्दः 'परम-शिव' वाची। अतो योगरूढोऽयम् 'ईशान' शब्दः परमशिवे वर्त्तमानः। इत्थं सर्वोत्कृष्टफलार्थिभिः सर्वातिशायि-ऐश्वर्यसम्पन्नः परमशिवः = सदाशिवः सर्वसेव्यः प्रकर्षेण ध्यातव्यः = ध्यानस्य विषयीकरणीयः। अयम् ईशानः कारणानां = ब्रह्म-विष्णु-रुद्राणामपि ध्याता = आदिसङ्कल्पकर्ता अस्ति। अतः कारणानामपि कारणत्वात् कल्याणकरः परमशिवो ध्येयः। उक्तञ्च कूर्मपुराणे युगधर्मप्रकरणे -

**'ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः।**
**द्वापरे दैवतं विष्णुः कलौ देवो महेश्वरः।। इति।'**

महेश्वरस्य = शिवस्य **सहिष्णुत्वं** प्रसिद्धम्, स तु भावैकसुलभः। 'नमः सहमानाय, आषाढाय' इत्यादिषु 'षह् मर्षणे' धातोः निष्पन्नप्रयोगाः परमशिवस्य सहिष्णुत्वं दर्शयन्ति, अनुभावयन्ति च भक्तान्। शिवो वाञ्छाधिकफलप्रदः प्रसिद्धः। उक्तञ्च **शिखरिणीमालायाम**प्ययदीक्षितपण्डितेन -

**'सहिष्णुस्त्वं तावत् परमशिव भावैकसुलभः,**
**प्रसादस्ते हस्ते कृत इव झटित्येव भजताम्।**
**प्रसादं च स्वामिन् प्रणतजनवाञ्छासमधिकम्,**
**त्वदीशं विश्वं तद् गतिरिह बुभूषोरपि भवान्।।'**

अतः परमशिवस्य सहिष्णुत्वात् '**त्वमेकः सर्वेषां पुरमथनसेव्यो जनिमताम्**'इत्यादिना

**'त्रयाणां देवानां भवतु सममैश्वर्यमथवा,**
**भवत्वेषां मध्ये भवभयहरः स्थाणुरधिकः।**
**प्रसिद्धस्त्वं तावत् 'परमशिव' सर्वोत्तर इति,**
**त्वमेकः संसेव्यो भवसि निखिलस्यापि जगतः।।'**

इत्यादिना च शिखरिणीमालायामप्पयदीक्षितेन सर्वसेव्यत्वमुदीरितम्। श्रीसाम्बसदाशिवार्पणमस्तु।

**सम्पादकः**
**व्याकरणपीठाध्यक्षचरः,**
**जगद्गुरु-रामानन्दाचार्य-राजथान-संस्कृत-**
**विश्वविद्यालयः,जयपुरम्,**
**दूरभाषाङ्कः 8386943655**

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ तृतीयस्सर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

अथोद्धवं वीक्ष्य विचारशून्यं
वेदान्तसूत्रोद्भवपक्कबोधम्।
सखीभिरावृत्य निकुञ्जभूमौ
स्थितम्प्रियम्पृष्टमिदम्प्रियाभिः ।।१।।

वदोद्धव !श्रीवसुदेवसूनुः
व्रजाङ्गनाचित्तहरो व्रजस्य।
कदापि राधाम्प्रियवल्लभां किं
स्मरन् पुरस्त्रीषु करोति चर्चाम्।।२।।

यथा नदीनाञ्जलजादिकानां
जलं विना जीवनमेव नास्ति।
हरेर्मुरारेर्व्रजकन्यकानां
तथोद्धव! प्रेमजलं विना नः।।३।।

अहर्निशं तत्स्मरणं विधाय
स्थिता वयं दर्शनलालसायाम्।
यशोदया लालितपालितोऽसौ
व्रजं कदायास्यति गोकुलेशः।।४।।

अरे! भवत्यःकथमत्र कृष्णं
स्मरन्ति गोप्यो विरहव्यथायाम्।
शपन्ति तस्मै व्रजभूषणाय
रुदन्ति कृष्णस्य कृते किमर्थम्।।५।।

सर्वे व्रजे शान्तधिया वसन्ति
कृष्णस्सदा गोकुलमाररक्ष।
किं तेन नीतं व्रजगोपिकानां
स रिक्तहस्तो मथुराञ्जगाम।।६।।

क्व कृष्णचन्द्रो मथुरानरेशः
क्व यूयमत्र व्रजवासिकन्याः।
मिथो द्वयोः का तुलना क्व मैत्री
ह्यरण्यरोदं शृणुयान्नु को वः ?।।७।।

अतो निराकारमजन्निरीहं
विभुम्परं ब्रह्म सनातनं यद्।
चलन्तु चायान्तु वयम्मिलित्वा
मनो नियम्यात्मनि तञ्जपामः।।८।।

हरन्तु चित्रं हृदयान्मुरारेः
त्यजन्तु भक्तिं गुणकीर्तनञ्च।
निमील्य नेत्रे स्वमनांसि हत्वा
निजासने ध्यानरता भवेयुः।।९।।

मनोऽपहृत्य व्रजगोपवध्वः
स्वयं व्रजेशान्नवनीरदाभात्।
विजित्य सर्वेन्द्रियकार्यभारं
पद्मासने योगरता भवेयुः।।१०।।

अरे! मनो नःपरमप्रियेणा-
हृतम्मुकुन्देन तदप्यवश्यम्।
ततो न चायाति कदापि पार्श्वे
न सन्त्यनेकानि मनांसि बन्धो!।।११।।

मनो विना निर्गुणनिर्विकारं
सनातनं ब्रह्म विभुं निरीहम्।
वदोद्धव! स्नेहविहीनशुष्कं
कथन्नमामश्च कथञ्जपामः।।१२।।

इदन्निराकारनिरीहतत्त्वं
स्थितं क्व देशे च करोति किं किम्?
किमस्य रूपञ्च किमस्ति नाम
प्रसन्नचित्तं ह्युत खिन्नचित्तम्।।१३।।

किमेतदत्रागमनं विधाय
प्रकाममस्मान् करपङ्कजाभ्याम्।
निनाद्य वेणुम्मधुरं तदेव
प्रदर्शयिष्यत्यधुना स्वरूपम्।।१४।।

अये! किमेतन्नवनीतचौर्यं
विधाय रोमाञ्चितरासलीलाम्।
निकुञ्जवृन्दावनकुञ्जवीथ्यां
करिष्यति प्रेममयीन्नवां किम्?।।१५।।

विनाश्य दैत्यान् व्रजनाशकांस्तान्
मुरारिकृष्णो व्रजमाररक्ष।
तथा किमेतत्तव निर्विकल्पं
पुनश्च रक्षिष्यति निर्गुणं किम्।।१६।।

मयूरपिच्छस्थकिरीटशोभां
शिरस्युरस्स्थां वनमालिकां ताम्।
यथा च कृष्णो निजभालचन्द्रे
सुशोभितं तत्तिलकं निधत्ते।।१७।।

तथोद्धवस्त्वं वद रूपहीनं
परात्परं ब्रह्म विशुद्धबुद्धम्।
करे च धत्ते मुरलीम्प्रियां किं
मुखारविन्दे नयनारविन्दे।।१८।।

व्रजाङ्गनाप्रश्नसमूहवृष्ट्या
परास्तबुद्धिश्च निरस्तविद्यः।
निरुत्तरस्सन् व्रजगोपिकास्ता
प्रणम्य तासां स्तुतिमाचकार।।१९।।

अहो स्थितिः क्लिष्टतपोभिरुग्रै-
रनेकजन्मार्जितपुण्यसाध्या।
महर्षिभिस्सा भवतीभिरेषा
सुसाधिता निश्छलशुद्धभक्तेः।।२०।।

सदा भवत्यः कमनीयकान्तं
स्वयंक्षयन्त्यः प्रियकृष्णचन्द्रम्।
निरन्तरं तम्मनसा स्मरन्त्यः
तमेव सर्वत्र विभावयन्ति।।२१।।

ततोऽतिरिक्ते स्पृहणीयलोके
पतौ गृहे पुत्रकलत्रकोशे।
न रागबुद्धिर्न मनोऽभिलाषः
सदैव कृष्णं हि विलोकयन्ति।।२२।।

व्रजाङ्गनास्ताःप्रियगोकुलेन्दोः
मुहुर्मुहुस्स्नेहमयीम्मनोज्ञाम्।
छविं स्मरन्त्यो हृदयेऽद्वितीयां
समास्तदानीं विरहे विलेपुः।।२३।।

विलोक्य तासां विकलामवस्थां
स चोद्धवश्श्यामपरायणानाम्।
प्रियाङ्गनानां हृदयस्थभक्तिं
दृढाम्प्रपश्यन् पुनरेवमाह।।२४।।

व्रजेन्द्रकृष्णस्मरणं विधाय
स्वयं व्रजेशप्रियगोपिकाभिः।
अहो वियोगे भवतीभिरस्मिन्
प्रचालिते प्रेमनदीप्रवाहे।।२५।।

अनेकशास्त्रज्ञमहर्षिवर्याः
धुरन्धरास्त्यागतपस्सु तप्ताः।
प्रकृष्टवेदान्तमहार्थिनस्ते
प्रवाहितास्सन्ति महातपस्विनः।।२६।।

क्व नीरसं ज्ञानमियं क्व भक्तिः
प्रभुप्रियस्नेहरसाद्वितीया।
जगत्पतेर्लाकृतिकस्य तस्य
स्थितिस्स्वयं यत्र विभाति विष्णोः।।२७।।

विभिन्नविद्याभ्रमजालयुक्ते
न बुद्धिमार्गे रमते सुभक्तः।
हरेर्मुरारेश्शकटासुरारेस्
सदैव भक्तौ हि बुधा रमन्ते।।२८।।

समानमोहाश्च सकामलोभाः
सदेन्द्रियारामतपोविहीनाः।
मठेषु शिष्यासु धनेषु लिप्सा
सदैव येषां न च ते सुभक्ताः।।२९।।

अधीत्य शास्त्राण्यपि ये रमन्ते
जनाः कुमार्गे विषयेषु सक्ताः।
न भक्तिमार्गे परमेश्वरं ते
कदापि रागेण हरिम्भजन्ते।।३०।।

हरिप्रियाभिर्भवतीभिरेषा
मनोरमा या व्रजराजभक्तिः।
अनुष्ठिता तेन हरिस्सदैव
स्मरत्यसौ वो मथुरापुरीशः।।३१।।

स देवकीनन्दनभक्तपालो-
ऽप्युवाच माम्मौखिकवाचया यद्।
परस्परस्नेहरसान्वितं वः
तदेव शृण्वन्तु निवेदयामि।।३२।।

स चोद्धवो भक्तिरसाभिषिक्तः
श्रुतं व्रजेशस्य मुखात्तदानीम्।
प्रियम्प्रियस्योत्तमवाचि रम्यं
नवं हि सन्देशमुवाच ताभ्यः।।३३।।

सदा भवत्यो हृदये मदीये
वसन्ति तिष्ठन्ति न सन्ति दूरम्।
व्रजम्मनो मेऽनुपमं सुरम्यं
जहाति नाद्यापि कदापि सख्यः।।३४।।

तिलेषु तैलं च पयस्सुसर्पिः
यथास्ति संव्याप्तमहं तथैव।
अतस्सखायो व्रजवासिनो मे
गोप्यो वियुक्तो न भवामि युष्मत्।।३५।।

न मेऽत्र सख्यो न च मे सखायः
न बालगोपाश्च न सन्ति गावः।
न गोपवध्वो न च रासलीला
निकुञ्जकुञ्जेषु विहारलीला।।३६।।

न चात्र सख्यः! मुरली मदीया
कदापि रागे रमते कथञ्चित्।
न ता लतास्ते हरिताश्च वृक्षास्
त्वहं न जाने क्व समागतोऽस्मि।।३७।।

न मे रुचिर्भोगविलासपूर्णे
स्वजीवने वा परजीवने वा।
न हर्म्यनारीषु मनो मदीयं
कदापि सख्यो रमते कुतश्चित्।।३८।।

न राजकार्ये मथुरानगर्याः
प्रशासने मे रतिरस्ति काचित्।
न राजमन्त्रालयलोलुपोऽहं
न राजकीये नियमे भवामि।।३९।।

न चातिकालम्मथुरानगर्यां
स्थिरो भविष्याम्यहमत्र सख्यः!
स्वबान्धवानाम्मतमादधानस्
स्वतोऽचिर प्रस्थितिमाकरिष्ये।।४०।।

मदीयमाता स्वकुलानुसारं
गुरोस्समीपे गमनं विधाय।
प्रशिक्षणं सर्वमवाप्तये मां
स्ववेदविद्याध्ययनार्थमाह।।४१।।

अशिक्षितानात्र यशो न कीर्तिः
न चादरो नापि च सम्प्रतिष्ठा।
सुशिक्षितानाम्परिमार्जितानां
सदा समाजे भवति प्रतिष्ठा।।४२।।

स्वजातिसम्बन्धितसज्जनानां
स्वपूर्वजानां कुलबान्धवानाम्।
स्वजन्मदातुस्स्वपितुश्च नित्यं
स्वमातुराज्ञा परिपालनीया।।४३।।

अतो मदर्थं भवतीभिरेषा
चिरप्रतीक्षा मम नो विधेया।
मया हि वह्न्यर्थमिदं शरीरं
धृतम्भवत्यस्स्वगृहम्प्रयान्तु।।४४।।

ममान्यकार्याणि बहूनि लोके
लसन्ति शेषाणि च सम्प्रकर्तुम्।
व्रजे हि सख्यः! मम सोऽतिदिव्यः
सुबाललीलासमयः प्रयातः।।४५।।

कथां व्रजेशस्य यथार्थवाचा
स चोद्धवो यद्यपि सत्यमाह।
तथापि गोप्यः पुनरेवमेताः
तमुद्धवम्मौखिकवाचयाहुः।।४६।।

पुरा प्रकर्तुं व्रजराजकृष्णात्
सुदूरमस्मानशकः प्रयासम्।
अथाधुना त्वम्मथुरापुरीतः
सुदूरमेवेच्छसि वासुदेव ।।४७।।

सखीषु चैका चतुरासु तासु
प्रकृष्टरुष्टा तरुणी न्यगादीत्
तमुद्धवं भो जगदीशमित्र!
त्वदीयबुद्धिर्विकृताभवत्किम्।।४८।।

व्रजेशकृष्णम्प्रिययादवेन्द्रं
सदैव दूरं यतते प्रकर्तुम्।
सखीभ्य आगत्य वियोक्तुमस्मत्
न वञ्चनीया व्रजराजसख्यः।।४९।।

तवेश्वरो ब्रह्म च रूपहीनं
मनोऽपि ते निर्गुणनिर्विकारम्।
मतिस्तथैवास्ति च ते निरूपा
कथं त्वमेवाकृतिमान् गुणी रे?।।५०।।

वयं हि सर्वे सगुणास्सरूपाः
न निर्गुणाश्चाकृतितो विहीनाः।
अतोऽस्मदीयः प्रभुरीश्वरो वा
गुणैर्हि युक्तोऽवयवी च भूयः।।५१।।

यथा हि कार्यं भवति प्रभूतं
तथा हि तत्कारणमीयते ज्ञैः।
न निर्विकल्पात् सविकल्पसृष्टिः
न निर्गुणाद्वा सगुणा सुसृष्टिः।।५२।।

मतं त्वदीयं न विचारयोग्यं
न तेऽपि सन्देशममुं च शृण्मः।
तमेव सुश्रावय रे च गत्वा
यतस्त्वमत्रागतवान्, प्रयाहि।।५३।।

गोपालबालान्नवपीतवस्त्रात्
वंशीधराद्वा कमनीयकान्तात्।
कृष्णात् परं ब्रह्म वयं न किञ्चित्
जानीमहे ह्युद्धव! निर्गुणं तत्।।५४।।

**********

**इति गोपाङ्गनावैभवम्महाकाव्यस्य तृतीयस्सर्गः।**

**सह-आचार्यः**
**संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्**
**जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67**

# डॉ. हरिरामाचार्यप्रणीतमधुच्छन्दाकाव्ये अलङ्कारविमर्शः

❑ डॉ. ललितकिशोरशर्मा

**अलङ्कारयोजना -**

काव्येषु अलङ्काराणां मुख्यत्वम् अतिरोहितमेव। सर्वेऽपि आलङ्कारिकाः अलङ्कारं काव्यस्य प्रमुखेषु तत्त्वेषु अन्यतमं मन्यन्ते एव। जयदेवस्तु अलङ्काररहितं काव्यमेव नाङ्गीकरोति। अलङ्कारादेव काव्यस्य ग्राह्यत्वम् उक्तं भट्टवामनेन '**काव्यं ग्राह्यम् अलङ्कारादिति**।' परन्तु ध्वनिसिद्धान्ताविष्कारानन्तरम् आलङ्कारिकैः ऐच्छत्वं प्रतिपादितं तत्र। मम्मटभट्टैः काव्यस्वरूपनिर्देशे एव '**अनलङ्कृती पुनः क्वापि**' इत्युक्तं प्रसिद्धमेव। आनन्दवर्धनाचार्यैरपि ध्वन्यालोके **अङ्गाश्रितास्तु अलङ्काराः मन्तव्याः कटकादिवत्** इति अलङ्काराणां रसोपकारे अनियतत्वं काव्ये अनियतस्थितिकत्वञ्च उक्तम्। परन्तु जगन्नाथेन अर्थचित्राणामपि रसिकश्लाघ्यत्वं ब्रुवाणेन अलङ्काराणां सौन्दर्याद्यतिशयत्वं स्फोरितमेव।

यद्यपि गीतिकाव्येषु भावपक्षस्यैव प्राधान्यात् तत्र गीतिकाव्येषु अलङ्काराणाम् अवश्यम्भावो नोच्यते तथापि अलङ्कारेषु सत्सु तेषां सौन्दर्यश्रीवृद्धिः भवत्येव। इतः परं मधुच्छन्दाकाव्ये तत्र तत्र अपृथग्यत्ननिर्वर्तितानाम् अलङ्काराणां परिचयः यथोपयोगं दीयते।

**उपमालङ्कारः -**

माङ्गल्ये प्रकरणे '**जय सुरभारति**' नामके गीते

**आसीना भव मानस-हंसे**
**कुन्द-तुहिन-शशि-धवले!**
**हर जडतां कुरु बोधि-विकासं**
**सित-पङ्कज-तनु-विमले!**[1]

इत्यस्मिन् उपच्छेदे उपमालङ्कारस्य सुन्दरः प्रयोगः कृतः। अत्र कुन्दतुहिन- शशिनाम् अनेकेषामुपमानानां प्रयोगात् मालोपमा। तथैव सित-पङ्कज-तनु-विमले इत्यत्रापि उपमा बोध्याः।

इत्थमेव राष्ट्रियप्रकरणे '**जयनारायणगीतौ**' जयनारायणव्यासः सृष्टौ व्यासौ नाशे च, ब्रह्मा इव, विष्णुः इव, शिव इव च वर्णितः। तथैव वज्रायते तदा वृत्रार्थे कुसुमायते यमायते इत्यादिषु क्यङ्गता उपमा कवेः व्याकरणादिशास्त्रवैदुष्यं ध्वनयति। तथैव भीमाकारः इत्यत्रापि आर्थी उपमा द्रष्टव्या। सर्वत्र उपमासु साधारणधर्मस्य निर्देशे अस्य कवेः अनितरसाधारणं प्रातिभवैभवं प्रकटीभवति। ऋतुचक्रीयप्रकरणे हेमन्त-गीतौ हेमन्तऋतुः पुष्पासव इव मदनीयः, प्रणयोत्सव इव रमणीयः, प्रियाश्लेष इव कमनीयः, सोमाहुतिरिव हवनीयः इति उपमालङ्कारस्य एव अपूर्वेण कौशलेन निष्पत्तिः कृता। तत्र यथा पुष्पासव मदनीयः तथैव हेमन्तोऽपि मदनीयः इति सर्वत्र उपमानोपमेय-साधारणधर्मवाचकपदानां चतुर्णामपि उपमावयवानां निर्देशात् इयं पूर्णोपमा। अत्र आभिः उपमाभिः हेमन्तस्य मादकत्वं रञ्जकत्वं रतिजनकत्वं पवित्रत्वं च बोध्यते। इत्थम् उपमालङ्कारप्रयोगे अस्य कवेः नैपुण्यम् असाधारणं दृश्यते।

**व्यतिरेकालङ्कारः :-**

उपमानस्य अपेक्षया उपमेयस्य विशेषः यत्र वर्ण्यते सः व्यतिरेकः अलङ्कारः।

लक्षणम् -

**आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा।**[2]

प्रथमे प्रकरणे यथा –

**स्मिताधरीकृत-क्षीरसमुद्रां**
**वर-पद्मासन-संस्थिताम्।**
**वाणीं निखिलभुवन-कल्याणीं**
**सत्कवि-रसना-गुञ्जिताम्।**
**वन्दे देवीं शारदाम्॥**[3] इति।

अस्मिन् श्लोके देव्याः सरस्वत्याः स्मितस्य क्षीरसमुद्रस्य धवलिम्नः प्रसिद्धत्वात् द्वयोः सादृश्यं प्रसिद्धम्। तत्र क्षीरसमुद्रस्य देव्याः स्मितेन अधरीकृतत्व वर्णनम् उपमेयस्य स्मितस्य विशेषकथने पर्यवस्यति इति अत्र स्पष्टमेव व्यतिरेकालङ्कारः विद्यते। तथैव जयनारायणगीतौ **'तं त्रिदेवमय-विभु-स्वरूपं नव-नव-सृष्टि-परायणम्'** इति अस्यामेव पङ्क्तौ व्यतिरेकालङ्कारस्य समीचीना निष्पत्तिः कविना कृता। तथाहि अत्र पूर्वासु तिसृषु पङ्क्तिषु उपमेयभूतः जयनारायणः त्रिभिः देवैः उपमितः। इत्थंभूतस्य उपमेयस्य पुनः त्रिदेवमयविभु-स्वरूपम् इति विशेषणं त्रिषु देवेषु पृथक्-पृथक्पर्याप्तत्वेन वर्तमानानां गुणानाम् अस्मिन् एकस्मिन् सत्तां बोधयति। अतः अयं त्रिभिः देवैः विशिष्टः इति व्यतिरेकालङ्कारः अत्र ध्वन्यते।

**विरोधाभासालङ्कारः –**

**लक्षणम् –**

**विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।**[4]

प्रथमे माङ्गल्ये प्रकरणे चतुर्थे गीते **'गणपतिं हवामहे'** इति नामके विरोधाभासालङ्कारस्य सुन्दरः प्रयोगः कविना कृतः। यथा –

**एकदन्तधारकोऽप्यनेकदन्तविश्रुतः।**
**अङ्कुशाभिभूषितोऽपि यः निरङ्कुशः श्रुतः॥**[5] इति।

अस्मिन् पद्यार्द्धे कविना भगवान् गणपतिः एकदन्तवत्त्वेन वर्णितः। तथैव **'अनेकदन्तविश्रुतः'** इति पदेन अनेकदन्तः इति विश्रुतः इत्यर्थकेन तस्य गणपतेः अनेकदन्तवत्त्वं च वर्णितम्। एकदन्तवत्त्वं च वर्णितम्। एकदन्तवत्त्वम् अनेकदन्तवत्त्वञ्च परस्परविरोधिनी अतः एकत्र उभे न तिष्ठतः। कविना परम् उभयोः गणपतिरूपैकाश्रये उभयोः स्थितिर्वर्णिता। अतः अत्र विरोधस्य स्फुटत्वात् विरोधाभासालङ्कारः। विरोधस्य परिहारः च इत्थं कर्त्तव्यः। अनेकदन्तविश्रुतः इति शब्दे समासभेदः आश्रणीयः। अनेकदन्तेषु देवमनुष्यादिषु विश्रुतः। इत्थम् अनेकदन्तवत्त्वम् इदानीम् एकदन्त-वद्भिन्नेषु समागतमिति विरोधः परिह्रियते।

एवमेव अङ्कुशाभिभूषितः इत्यनेन गणपतेः अङ्कुशवत्त्वं वर्णितम्। तत्रैव यो निरङ्कुशः श्रुतः इत्यनेन अङ्कुशराहित्यं च वर्णितम्। इत्थम् एकस्मिन्नेव गणपतौ अङ्कुशवत्त्वम् अङ्कुशाभावः च परस्परविरोधिनौ वर्णितौ इति विरोधः। तत्रापि अङ्कुशशब्दस्य द्वितीयवारे अर्थभेदकरणेन विरोधस्य परिहारः कर्त्तव्यः। अङ्कुशः नाम नियन्त्रकः। इत्थं निरङ्कुशशब्देन गणपतेः स्वेतरशासकराहित्यम् उच्यते। इत्थम् अङ्कुशवत्त्वस्य शासकराहित्यस्य च विरोधः नास्ति इति विरोधस्य परिहारो भवति।

**रूपकालङ्कारः –**

**लक्षणम् –**

**विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।**
**रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥**[6]
**तद्रूपकमभेदो य उपमानोपमेययोः।**[7]

द्वितीयप्रकरणे राष्ट्रियाख्ये **'वयं राष्ट्रे जागृयाम'**[8] इति नामके रूपकालङ्कारस्य रुचिरः प्रयोगः कविना कृतः। अत्र **'भेदभावानां निशायाम् एकताकिरणान् किरन्तु'**[9] इत्यत्र रूपकालङ्कारस्य कविना अतिसुन्दरः

प्रयोगः कृतः। अत्र भेदभावः निशात्वेन रूपितः। एवम् एकता किरणत्वेन रूपिता। यथा निशायाः नाशे किरणेषु यत्नः कर्त्तव्यः तथैव भेदभावानां विनाशे एकतायां यत्नः करणीय इति उपदेशसारः अनेन रूपकालङ्कारेण सम्यक् कृतः।

एवमेव '**मनो मधुपायते**'[10] इति गीते -

**वीक्ष्य वरवदनाम्बुजं ते मम मनो मधुपायते।**
**मुहूर्तं छविसुधां पातुं चेतना चषकायते॥**[11]

इत्यस्मिन् गीते वदनमेव अम्बुजं वदनाम्बुजम् इति रूपकसमासः आश्रयणीयः न च अत्र वदनम् अम्बुजम् इव वदनाम्बुजम् इति उपमितसमासाश्रयेण उपमालङ्कारो भवतु इति शङ्का कार्या। यतः '**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे**'[12] इति सूत्रेण सामान्यस्य साधारण-धर्मवाचकस्य पदस्य अप्रयोगे एव उपमितसमासः विहितः। अस्मिन् स्थले वरवदनाम्बुजम् इत्यत्र अम्बुजे वदने च वरत्वं सामान्यधर्मः उपात्तः अस्ति। अतः अत्र सामान्यस्य प्रयोगः अस्ति इति उपमितसमासः न भवति। अतः अत्र कर्मधारय एव अङ्गीकरणीयः।

'**वदनाम्बुजे रमणाय मनः मधुपायते**' इत्यत्र तु उपमालङ्कार एव। पुनः '**छविसुधां पातुम्**' इत्यत्र रूपकमेव। छविः एव सुधा छविसुधा अत्रापि छविः सुधात्वेन रूपितः। अतः अत्र रूपकालङ्कारः।

**हेत्वलङ्कारः -**

**लक्षणम्-**

**हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते।**[13] इति।

'**मनो मधुपायते**' इति गीते एव चतुर्थे उपच्छेदे हेत्वलङ्कारस्य सुन्दरः प्रयोगः अस्ति। '**वियोगः करकानिपातः**' इत्यत्र वियोगः हेमन्ततुल्यः इति वर्णयितव्ये हेमन्तकार्यभूतेन करकानिपातेन वियोगस्य अभेदः कथितः। इत्थं हेतुमतः करकानिपातस्य हेतोस्तुल्येन वियोगेन अभेदस्य वर्णनात् अत्र हेत्वलङ्कारः। यदि करकाः निपतन्ति अस्मिन् इति करकानिपातः इति अधिकरणे घञ् स्वीक्रियते तर्हि अत्रापि रूपकालङ्कारः एव।

**निदर्शनालङ्कारः -**

**लक्षणम्-**

**अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः।**[14]

**वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।**[15]

'**निर्माणगीतौ**' निदर्शनालङ्कारस्य समीचीनः प्रयोगः कृतः।

**अस्माभिः परिवर्तनकामैः**
**नव-समाज-संस्थापन-कामैः**
**उदधि-मन्थने जाते प्रथमं**
**हालाहल-पानं करणीयम्।**[16]

अत्र अस्माभिः हालाहलपाने करणीयम् इति एकं वाक्यम्। अत्र अस्माभिः इत्यस्य नवसमाजसंस्थापन-कामत्वं विशेषणम् इदञ्च विशेषणं विशेष्यञ्च कर्त्तव्यबोधनपरमस्ति। इत्थंभूतैः अस्माभिः हालाहलपानं करणीयम् इत्युक्ते नवसमाजसंस्थापनस्य उदधिमन्थनस्य च समानतया तत्र सम्भवतां विघ्नानां हालाहलतुल्यतया च तुल्य एव वाक्ययोः ऐक्यारोपात् अत्र निदर्शनालङ्कारः। अर्थात् अत्र अस्माकं नवसमाजसंस्थापनकामत्वमिति एकं वाक्यम्। उदधेः मन्थनमिति अपरं वाक्यम्। नवसमाजसंस्थापने विघ्नाः सम्भवन्ति इति अपरं वाक्यम्। व्यङ्ग्यं हालाहलपानं करणीयमिति अपरं वाक्यम्। अत्र नवसमाजसंस्थापनस्य उदधिमन्थनस्य च ऐक्यारोपात् व्यङ्ग्यभूतस्य विघ्नसहनस्य हालाहल-पानस्य च ऐक्यारोपात् अत्र निदर्शनालङ्कारः स्फुटः।

**परिवृत्त्यलङ्कारः -**

लक्षणम्-

**परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः।**[17]

**परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः।**[18]

**'भावपुष्पम् अर्पयामः'** इत्यस्मिन् गीते परिवृत्त्य-लङ्कारस्य रमणीयम् उदाहरणमेव मन्यते।

**विकट-शस्त्रं निजकरे यैः**
**शान्तिरक्षार्थं गृहीतम्।**
**देह-बलि-दानेन समरे**
**मुक्ति-मुक्ताफलं क्रीतम्।**
**अद्य तेषां शौर्य-गाथां वयं निजहृदि कीर्तयामः।**[19]

इत्यस्मिन् गीते वीराणां देशरक्षार्थं हुतात्मनां चरित्रम् उपश्लोकितम्। अत्र देहस्य बलिदानेन मुक्तिरूपं मुक्ताफलं वीरैः क्रीतम् इति कविना वर्णितम्। अत्र मुक्तिः परमसुखस्वरूपा अनश्वरी अज्ञानविरोधिनी परमपुरुषार्थ-रूपा विद्यते। इयं च मुक्तिः सर्वस्मात् वस्तुनः अभ्यर्हिततमा इति शास्त्रं प्रतिपादयति। एतद्विपरीतं मानवदेहः सर्वाशुचिनिधानं कृतघ्नः विनाशी जुगुप्सनीयः च शास्त्रेषु एव प्रतिपादितम्। शरीरस्य जुगुप्सनीयतां प्रतिपादयन् श्लोकः कश्चित् -

**यदि नामास्य कायस्य यदन्तः तद्बहिर्भवेत्।**
**दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेत्॥**[20]

इति कथयति। इत्थं प्रत्यक्षेण शास्त्रैश्च प्रतिपादितहेयभावस्य देहस्य उत्सर्गेण परमपुरुषार्थभूतां सकलसाधुजनपरमाभिलषणीयां मुक्तिं वीरैः क्रीतम् इति कथनेन न्यूनाधिकयोः विनिमयस्य वर्णनात् अत्र परवृत्त्यलङ्कारः अस्ति।

**अप्रस्तुतप्रशंसालङ्कारः -**

**लक्षणम् -**

**अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया।**[21]

**अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।**[22]

**'क्रौञ्चवधा जायन्ते दिने दिने'** इत्यस्मिन् गीते अप्रस्तुतालङ्कारस्य रमणीयमुदाहरणम् अस्ति। यथा -

**पश्य मुने प्रतितमसातीरम्**
**वातावरणमशान्तमधीरम्।**
**क्रन्दति करुणा-क्रौञ्ची विकला**
**शान्ति कपोती लुठति विह्वला।**
**दया-द्रुमा अनिशं भज्यन्ते**
**युगनिर्मितियज्ञा नश्यन्ते।**
**आखेटं रचयन्ति लुब्धकाः**
**पावनतपोवने।**
**क्रौञ्चवधा जायन्ते दिने दिने॥**[23]

अस्मिन् गीते **प्रतितमसातीरम्** इति क्रौञ्ची-क्रन्दन-मिति लुब्धकानाम् आखेटरचनम् इति च अप्रस्तुतैः वृत्तान्तैः प्रस्तुतस्य देशस्य भ्रष्टाचारपीडित-जनतायाः क्रन्दनस्य भ्रष्टाचारिणां कदाचारस्य च बोधनं भवति इत्यतः अत्र प्रस्तुतप्रशंसालङ्कारः। इत्थम् अप्रस्तुतैः वृत्तान्तैः प्रस्तुतस्य वृत्तान्तस्य व्यञ्जनेन अत्र अप्रस्तुतालङ्कारः। इत्थं तत्रैव -

**नव-नव काञ्चनमृगाः प्रजाताः**
**प्रण-वीरा व्यामूढा जाताः।**
**शबरीणामपमानं क्रियते,**
**सीताया मर्यादा ह्रियते।**
**नीतौ दशमुखविधिः प्रचलितः,**
**राम-राज्य-सुस्वप्नो गलितः।**
**छविः कलुषिता भविता नूनं**
**ह्यादर्शे मलिने।**
**क्रौञ्चवधा जायन्ते दिने-दिने।**[24]

इत्यस्मिन् गीतेऽपि **नवकाञ्चनमृगरूपेण** अप्रस्तुतवृत्तान्तेन प्रतारकाणां प्रणवीरव्यामोहरूपेण वृत्तान्तेन सज्जनानां भ्रमस्य शबरीणाम् अपमानरूपेण

वृत्तान्तेन अशक्तानां प्रधर्षणस्य सीतामर्यादाहरणरूपेण वृत्तान्तेन सतीनाम् अपमानस्य च अतिसमीचीनं व्यञ्जनं कविना कृतम्। अतः अत्रापि अप्रस्तुतप्रशंसालङ्कारः। अप्रस्तुतप्रशंसालङ्कारस्य पञ्चभेदाः प्रकाशकृता परिगणिताः।ते च -

**कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।**
**तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा॥**[25]

एषु पञ्चसु भेदेषु अत्र उदाहरणयोः प्रथमभेदः अर्थात् तुल्येन अप्रस्तुतेन तुल्यस्य प्रस्तुतस्य व्यञ्जना कृता वर्तते।इत्थम् अत्र अप्रस्तुतालङ्कारः।

**अतिशयोक्तिः -**

**लक्षणम् -**

**निगीर्याध्यवसानन्तु प्रकृतस्य परेण यत्।**
**प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्॥**
**कार्यकारणयोर्यश्च पौर्वापर्याविपर्ययः।**
**विज्ञेयाऽतिशयोक्तिः सा॥**[26]
**रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।**[27]

'**क्रौञ्चवधा जायन्ते दिने दिने**' इत्यस्मिन् गीते अतिशयोक्तिरपि अत्यन्तं कौशलेन कविना निष्पादिता। अत्र हि -

'**सृष्टा तन्त्रे कपट-पीठिका**

**कौशलेन रचिता मरीचिका**' इति अत्र रूपकातिशयोक्तिः वर्तते। कौशलेन रचिता मरीचिका इत्यत्र मरीचिकाशब्देन विषयिभूतेन विषयभूतः प्रतारणाविधिः निगीर्णः। इत्थम् अत्र विषयिवाचकपदेन एव अनुल्लिखितस्य अपि विषयस्य बोधनं तत्पूर्वकं विषयविषयिणोः अभेदाध्यवसायश्च कृतः इति अत्र अतिशयोक्तिरलङ्कारः।

'**सत्यमेव जयते**' इत्याख्ये गीते -

**मनुजचेतना बन्दीगृहतो मुक्तिं कामयते।**
**राष्ट्रभारती निगदति सततम् सत्यमेव जयते॥**[28]

इत्यत्र बन्दीगृहशब्देन विषयिवाचकेन संसारचक्रं विषयिभूतं निगीर्णम्। अत्र हि यथा बन्दीगृहे अर्थात् कारागृहे मनुष्यः सङ्कुचितस्वभावः सङ्कुचित-स्वरूपश्च न आत्मनः याथातथ्येन लभते न वा प्रकाशयितुं शक्नोति। अत्र मुक्तिं कामयते इत्यत्रापि मुक्तिशब्देन इव भोगान्धान्मुक्तिः कारागृहात् च मुक्तिः इति अर्थद्वयं स्वीकर्तव्यम्। अत्र मनुजचेतनायाः बन्धकत्वेन अज्ञानस्य बन्दीगृहरूपणम् अत्यन्तं चमत्कारकारि।

**समाध्यलङ्कारः -**

**लक्षणम् -**

**समाधिः सुकरं कार्यं कारणान्तरयोगतः।**[29]
**समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः।**[30]

यत्र कार्यस्य सिद्ध्यै एकस्मिन् कारणे व्यापारवति सति अन्यानि अपि स्वतन्त्राणि कारणानि प्रवर्तन्ते तत्र समाध्यलङ्कारः भवति। अस्मिन् काव्ये समाधेः अलङ्कारस्य सुन्दरम् उदाहरणं युगप्रभातगीते द्रष्टुं शक्यते -

**धरणी रागमयी सञ्जाता,**
**जडता याता निशा प्रभाता,**
**गन्धः पवनाञ्चलमाश्रयते,**
**चलत चलाम अग्रे यामः॥**[31]

अत्र '**चलत चलाम अग्रे याम**' इति वाक्येन कर्तव्ये करणे जनानां बलवतीं प्रवृत्तिं जागरयितुम् इच्छति कविः। एतावत्पर्यन्तं राष्ट्रनिर्माणरूपस्य कार्यस्य अवकाशः नाभूत्। परेषामेव शासनस्य विद्यमानत्वात् अयं देशः अस्मदधीनः नासीत्। किन्तु स्वातन्त्र्ये लब्धे इदं कार्यम् अस्माकमेव। इत्थं देशविकासस्य करणे स्वातन्त्र्यरूपे एकस्मिन् हेतौ सत्यपि इतरेषाम् अनेकेषां

हेतूनाम् धरण्याः रागस्य जडतानां नाशस्य इत्यादीनां उपादानात् अत्र समाध्यलङ्कारः।

**विषमालङ्कारः -**

**लक्षणम् -**

**क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्।**
**कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद् भवेत्॥**
**गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये।**
**क्रमेण च विरुद्धे यत् स एष विषमो मतः॥[32]**
**विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः।[33]**

यस्मिन् काव्ये सुतराम् अननुरूपयोः वस्तुनोः घटना वर्ण्यते तत्र विषमालङ्कारः भवति। अस्मिन् काव्ये कवेः ग्लानिसम्भृतेषु उद्वेगपूर्णेषु च गीतेषु अनेकत्र अयम् अलङ्कारः दृग्गोचरीभवति तथापि भूमिपुत्रः इत्याख्ये गीते राष्ट्रियप्रकरणस्थे अयमलङ्कारः भावव्यञ्जने अपूर्वां तत्परतां बिभर्ति।

**यन्मनुष्यः**
**भूमिजो भूत्वाऽपि**
**स्वीयां भूतधात्रीं मातरं शस्त्रैर्धिनोति।**
**भूमिपुत्रो मङ्गलो भूत्वाऽपि नित्यं**
**अमङ्गलकृत्यैः**
**स्वमातुर्धरण्याः हृदयं दुनोति।[34]**

अत्र मनुष्यः भुवो देव्याः पुत्रः तया जनितः पोषितः पालितः रक्षितः वर्धितः च। इत्थं तस्याः उपकारभारेण सुतरां युक्तोऽपि मनुष्यः कार्तज्ञ्यम् अप्रदर्श्य प्रत्युत तामेव मातरं भूमिम् अकारणं स्वार्थैकचित्तः हिनस्ति। अत्र परममङ्गलायाः सर्वमङ्गलविधात्र्याः धात्र्याः पुत्रः स्वयं मङ्गलभूतः अमङ्गलकृत्यैः स्वमातुः धरण्याः हृदयं दुनोति इति कृतघ्नस्य मनुष्यस्य कृपामय्या धरण्या सह वर्णनम् अननुरूपयोः घटनावर्णने पर्यवस्यति इति अत्र विषमालङ्कारः।

**प्रस्तुताङ्कुरालङ्कारः -**

**लक्षणम् -**

**प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः।[35]**

यत्र प्रस्तुतेनैव वाच्यभूतेन वृत्तान्तेन प्रस्तुतस्यैव व्यङ्ग्यभूतस्य वृत्तान्तस्य प्रकाशनं क्रियते तत्र प्रस्तुताङ्कुरालङ्कारः। अस्मिन् काव्ये अप्रस्तुतप्रशंसायाः रूपकातिशयोक्तेः च प्रचुरः प्रयोगः। तदनन्तरं प्रस्तुताङ्कुरालङ्कारः एव प्रचुरतया प्रयुक्तः। सङ्कल्पगीतौ अस्य अलङ्कारस्य उदाहरणं द्रष्टुं शक्यते। तद्यथा -

**गतिविकला विज्ञान-विजडिता**
**सन्त्रस्ता रोदिति मानवता,**
**निर्मिति-बीजं भूमौ वपत,**
**सौख्यं स्वयं फलिष्यति रे।**
**तिमिरं स्वयं गमिष्यति रे।[36]**

अस्मिन् उपच्छेदे भूमौ निर्मितिबीजवपनं प्रस्तुतम्। सौख्यफलमपि प्रस्तुतमेव। अनेन प्रस्तुतेन सामान्येन प्रस्तुतस्यैव स्वरूपकर्त्तव्यकरणरूपस्य विशेषस्य प्रत्यायनं भवतीति प्रस्तुतेन प्रस्तुतस्य द्योतनात् अत्र प्रस्तुताङ्कुरालङ्कारः।

**विभावनालङ्कारः -**

**लक्षणम् -**

**क्रियायाः प्रतिषेधेऽपि फलव्यक्ति-र्विभावना।[37]**

**विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।[38]**

यत्र विपरीतात् कारणात् कार्योत्पत्तिः वर्ण्यते तत्र विभावनालङ्कारः प्रसिद्धः। अस्य अलङ्कारस्य अतिरमणीयः प्रयोगः कविना **'कालिदासस्य कविता'** इत्याख्ये मुक्तके कृतः। तत्र -

**विलपति रतिः सकरुणं**
**यत्र च कामो हि भस्मसात् क्रियते।**

**शृङ्गारे तत्काव्यं**
**सर्वोच्चं केन नियमेन ?**[39]

इत्यत्र रतिः नायिका नायकस्य कामस्य मरणेन रुदन्ती वर्णिता। इत्थं नायकयोः परस्परं रतिः यत्र विलपति उभयोः कामश्च यत्र भस्मसात् भवति तस्मिन् काव्ये करुणरसस्य सामग्रीभरिते शृङ्गारस्य च प्रतिकूलैः वस्तुभिः युक्ते अपि शृङ्गाररसमयं काव्यं तत् इति प्रसिद्धिः नूनं विपरीतात् कार्योत्पत्तिः एव। इत्थम् अत्र अतिसुन्दरं रतिकामशब्दयोः श्लेषमाश्रित्य कविना विभावनालङ्कारः निष्पादितः।

**अपह्नुत्यलङ्कारः -**

**लक्षणम् -**

**प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः।**[40]

यस्मिन् काव्ये केनचित् कञ्चित् प्रति कस्यचन वृत्तान्तस्य वर्णने क्रियमाणे अन्येन अन्यार्थतया गृहीत्वा पृष्टे सति तस्य वृत्तान्तस्य याथार्थ्यं यत्र उद्घाट्यते तत्र भ्रान्तापह्नुत्यलङ्कारः। अस्य अलङ्कारस्य अतिसुन्दरम् उदाहरणं कालिदासकविता- प्रशस्तिनामके गीते कविना कृतम्। इदं सर्वमपि मुक्तककाव्यम् अस्यैव अलङ्कारस्य उदाहरणभूतं यथा -

**भाति सुवर्णा ककुभाभरणा**
**सरसा मधुर-भाव-ललिता।**
**किं सा वनिता ? नहि नहि कविता**
**कविवर-कालिदास-रचिता॥**[41]

अस्मिन् श्लोके सुवर्णा शोभनवर्णयुक्ता आभरणवती, मधुरभावललिता, सरसा इत्यादिभिः पदैः कालिदासस्य कविताप्रशस्तौ वर्ण्यमानायां सुवर्णादिपदैः कस्याश्चित् वनितायाः शोभनवर्णवत्याः भ्रमज्ञानम् आशङ्क्य नहि नहि कविता इति तत् अपह्नूयते इत्यतः अत्र अपह्नुत्यलङ्कारः।

**मुद्रालङ्कारः -**

**लक्षणम् -**

**सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः।**[42]

यस्मिन् काव्ये कवेः काव्यस्य अभीप्सितस्य कस्यचिदपि वा वस्तुनः नामनिर्देशः प्रकृतार्थाव्यवधानेन क्रियते तत्र मुद्रालङ्कारः भवति। अयम् अलङ्कारः मधुच्छन्दायां भारतसावित्रीनामके गीते उल्लसितो विद्यते। तत्र हि -

**ऋषिगण-कण्ठैर्यदोच्चारिता मन्त्रमङ्गला गायत्री।**
**पूता बृहती जगती, मूर्ता जाता भारत-सावित्री॥**[43]

अस्मिन् पद्ये यदा ऋषिभिः गायत्री उच्चारिता तदैव बृहती-जगती-भूमिः पूता पवित्रा जाता, भारतसावित्री-संस्कृतवाणीमूर्ता जाता इति वर्णितम्। इत्थम् अस्मिन् पद्ये अर्थव्यवधानं विना गायत्री-बृहती-जगती-सावित्री इति छन्दसां नामानि अपि निर्देशितानि। अतः अत्र मुद्रालङ्कारः।

इत्थम् अस्मिन् काव्ये यथा भावानां तथैव अलङ्काराणामपि रमणीयतया प्रयोगः कृतः कविना। अलङ्काराः कुत्रचित् सम्यक् अनिष्पन्नाः अपि कुड्मलतुल्याः क्वचित् निष्पन्नस्वरूपाः विकचपुष्पतुल्याः कामपि अभिख्यां दधति। अलङ्काराणाञ्च कविवर्येण डा.हरिरामआचार्येण समीक्ष्य विनिवेशनं कृतम्।

**- प्राचार्यः अध्यक्षश्च, साहित्यविभागः,**
**श्रीदिगम्बरजैन-आचार्यसंस्कृतमहाविद्यालयः,**
**जयपुरम्**
**पत्रसङ्केतः - 38, विवेक विहार, जगतपुरा,**
**जयपुर-302017, दूरभाष - 9413748055**
**ई-मेलसङ्केतः - lalit.sringeri@gmail.com**

1. मधुच्छन्दा जय सुरभारतिगीते, पृष्ठसंख्या-१२

2. साहित्यदर्पणम् - दशमः परिच्छेदः पृ.सं. -917, आचार्यशेषराजशर्मारेग्मी, चौखम्बाकृष्णदास-अकादमी, वाराणसी।

3. मधुच्छन्दा शारदावन्दनायाम्, पृष्ठसंख्या-13, डॉ.हरिरामाचार्यः, जगदीशसंस्कृतपुस्तकालयः, जयपुरम्, २..२

4. काव्यप्रकाशः - १०/१६५, आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी,१९६.

5. मधुच्छन्दा 'गणपतिं हवामहे' गीते

6. कुवलयानन्दः - श्लोकसंख्या-१७

7. काव्यप्रकाशः - १०/१३८, आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

8. मधुच्छन्दा 'वयं राष्ट्रे जागृयाम' गीते, पृष्ठसंख्या-१९

9. मधुच्छन्दा 'वयं राष्ट्रे जागृयाम' गीते, पृष्ठसंख्या-१९

10. मधुच्छन्दा - 'मनो मधुपायते' इति गीते, पृष्ठसंख्या - ३३

11. मधुच्छन्दा - 'मनो मधुपायते' इति गीते, पृष्ठसंख्या - ३३

12. अष्टाध्याय्याम् - २/१/५६ (पृ. ५०१)

13. कुवलयानन्दः- श्लोकसंख्या-१६७, भोला-शङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

14. काव्यप्रकाशः - १०/१४८, आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

15. कुवलयानन्दः - श्लोकसंख्या - ५३, भोला-शङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

16. मधुच्छन्दा - निर्माणगीती, पृष्ठसंख्या-२१

17. काव्यप्रकाशः - १०/१७१, आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

18. कुवलयानन्दः - श्लोकसंख्या-११२, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

19. मधुच्छन्दा - 'भावपुष्पम् अर्पयामः' गीती, पृष्ठसंख्या-२४

20. ध्वन्यालोकः - (लोचनटीकायाम्) - १/१४ (पृ.१४)

21. काव्यप्रकाशः - दशम उल्लासः - सू. १५., आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

22. कुवलयानन्दः - श्लोकसंख्या-६६, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

23. मधुच्छन्दा 'क्रौञ्चवधा जायन्ते दिने दिने' गीत्याम्, पृष्ठसंख्या-३५

24. मधुच्छन्दा 'क्रौञ्चवधा जायन्ते दिने दिने' इति गीत्याम्, पृष्ठसंख्या-३५

25. काव्यप्रकाशः - १०/१३, आचार्यविश्वेश्वरः, ज्ञानमण्डल-लिमिटेड, वाराणसी, १९६.

26. काव्यप्रकाशः - १०/१४ (पृ.सं.-७५), आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

27. कुवलयानन्दः - श्लोकसंख्या - ३६, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

28. मधुच्छन्दा 'सत्यमेव जयते' गीती, पृष्ठसंख्या-२५

29. काव्यप्रकाशः - १०/१९१, आचार्यविश्वेश्वरः, ज्ञानमण्डल-लिमिटेड, वाराणसी, १९६.

30. कुवलयानन्दः - श्लोकसंख्या - ११८, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

31. मधुच्छन्दा 'युगप्रभात' गीते, पृष्ठसंख्या-३.

32. काव्यप्रकाशः - १०/१९३, आचार्यविश्वेश्वरः, ज्ञानमण्डललिमिटेड, वाराणसी, १९६.

33. कुवलयानन्दः - श्लोकसंख्या - ८८, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

34. मधुच्छन्दा 'भूमिपुत्र' गीते, पृष्ठसंख्या-३१

35. कुवलयानन्दः - श्लोकसंख्या-६७, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

36. मधुच्छन्दा - सङ्कल्पगीत्याम्, पृष्ठसंख्या-३८

37. काव्यप्रकाशः - १०/१६१, आचार्यविश्वेश्वरः, ज्ञानमण्डल-लिमिटेड, वाराणसी,१९६.

38. कुवलयानन्दः - श्लोकसंख्या - ७७, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

39. मधुच्छन्दा कालिदासस्य कवितायाम्, पृष्ठसंख्या-४५

40. काव्यप्रकाशः - १०/१४५, आचार्यविश्वेश्वरः, ज्ञानमण्डल-लिमिटेड, वाराणसी, १९६.

41. मधुच्छन्दा 'कालिदासकविताप्रशस्ति' गीत्याम्, पृष्ठसंख्या-४६

42. कुवलयानन्दः - श्लोकसंख्या-१३९, भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम्, वाराणसी, १९९५

43. मधुच्छन्दा भारतसावित्रीनामके गीते, पृष्ठसंख्या-४९

# श्रीरामदूताष्टकम्

[ स्तूयते सिद्धपीठस्थो रामदूतो विशेषत: ]

❑ पं. नथमलशास्त्री दाधीच:

श्रीरामभक्तं पवमानपुत्रं तं केसरीसूनुमथाञ्जनेयम्।
रुद्रावतारं रणरङ्गवीरं श्रीरामदूतं शरणं प्रपद्ये।।१।।

सालासरे धाम्नि विराजमानं बालाजि-देवं प्रथितं जगत्याम्।
प्रपन्नभक्तार्त्तिहरं वरेण्यं श्रीरामदूतं शिरसा नमामि।।२।।

सुस्थापितं मोहनदासनाम्ना सिद्धेन सन्तेन तपस्विनाऽत्र।
सुसेवितं सख्यमुपागतं वै श्रीरामदूतं वचसा गृणामि।।३।।

सिन्दूरसौन्दर्ययुतं प्रसन्नं स्वतेजसाभासितदिव्यरूपम्।
भव्ये ललाटे लसदूर्ध्वपुण्ड्रं श्रीरामदूतं मनसा स्मरामि।।४।।

श्रीजानकीनाथमनुस्मरन्तं श्रीरामरामेति च कीर्तयन्तम्।
नामामृतास्वादनतत्परं वै श्रीरामदूतं हृदि भावयामि।।५।।

सदा सेव्यं देवं धृतिमतिविरक्तिष्वनुपमं सदा ध्येयं तत्त्वं हरिहरमयं दिव्यवपुषम्।
शिवांशं त्रातारं शरणसुखदं मारुतिमहं भजामि त्वां भक्त्या सकलभयहारी भव प्रभो!।।६।।

सीतान्वेषणतत्परो रघुपतेर्नामाङ्कितां मुद्रिकामादायानतमस्तको हरिवरो वज्रायुधो वारिधिम्।
उल्लङ्घ्य प्रययौ ततोऽब्धिपरिखां लङ्कां त्रिकूटस्थिताम्। तं वन्दे बलबुद्धिभक्तिविभवं रामाश्रयं मारुतिम्।।७।।

सीतां शोकभयार्दिताञ्च रुदतीमाश्वास्य रामेक्षणां, दत्त्वा यो हरिमुद्रिकां प्रियकरामादाय चूडामणिम्।
कृत्वा राक्षसराजदर्पदलनं दग्ध्वा च लङ्कापुरीमायातो मुदितप्रियो रघुपतेर्दूत: सदा पातु माम्।।८।।

सुग्रीवसचिवो वाग्मी रक्षोघ्नो निर्भयो बली।
लक्ष्मणप्राणसञ्चारी विभीषणवरप्रद:।।९।।

रामरूपकथालीलानामधामप्रिय: सदा।
हनुमान् स्मृतिगामी च चिरजीवी जितेन्द्रिय:।।१०।।

संकष्टमोचनो देवो वज्रदेहो दयानिधि:।
संस्तुतो वरदो भक्त्या, प्रीयतां भक्तवत्सल:।।११।।

श्रीरामचन्द्रार्पणमस्तु।
श्रीरामदूताय नम:।

पूर्वप्राध्यापक:
छापर ( चूरू )
मो. 9351226660

# ज्ञानिभक्तकृतश्रीविष्णुस्तोत्राणि

❑ सुमनलता सैनी

को नाम ज्ञानिभक्तः इति प्रथमतया विचारणीयो विषयः। ज्ञानमस्यास्तीति ज्ञानी, ज्ञानं च 'ब्रह्मसत्यं जगन्मिथ्या', 'सर्वं खल्विदं ब्रह्म' जीवः परमात्मनः अंशः एव तस्मात् ब्रह्मजीवयोरैक्यताबोधः ज्ञानम् तद् ज्ञानवान् ज्ञानी इति संक्षेपेण ज्ञेयम्। जगदिदं दृश्यमानं ब्रह्मणो विवर्तः इति वेदान्तिनः परब्रह्मज्ञानात् अविद्यावशाद् मूढाः असति जगति सतः व्यवहारं कुर्वन्ति–

**'यथा रज्जुं परित्यज्य सर्वं गृह्णाति वैभ्रमात्।**
**तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः।।'**

वस्तुतस्तु तद् ब्रह्मणः परमात्मनो मायामोहिता सर्वे हि जीवाः अविद्याकृता परिभ्रमन्ति –

**यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन्**
**सांसारिके पथि चरंस्तदभिश्रमेण।**
**नष्टस्मृतिः पुनरयं प्रश्रृणीतलोकं**
**युक्त्या कया महदनुग्रहमन्तरेण।।[1]**

अविद्या माया वेत्येषा दुरन्ता प्रबला चास्ति वयं ब्राह्मा वदति –

**भवांस्तु पुंसः परमस्य मायया**
**दुरन्तया स्पृष्टमतिः समस्तदृक्।**
**तया हतात्मस्वनुकर्मचेतः**
**स्वनुग्रहं कर्तुमिहार्हसि प्रभो।।[2]**

अन्यत्रापि – 'त्वन्माययाद्धा जन ईश खण्डितः' 'यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिः प्रकाशः' 'विष्णोर्माया भगवती यया संमोह्यते जगत्।' इत्यादिषु श्लोकांशेषु भगवन्मायायाः प्राबल्यं स्पष्टीभवति। एषा माया अविद्या वा भगवत्कृपया एव नश्यति दूरीभवति इति भक्तानामनुभवः। पुनश्च ज्ञानिनः कठोरतपसा वेदादिपूक्तत्त्वज्ञानेन परमरहस्यं विज्ञाय तं परमात्मानमुपयान्ति यथोक्तं गजेन्द्रकृतस्तवने मुमुक्षुणा गजराजेन –

**'योगरन्धितकर्माणो हृदि योगविभाविते।**
**योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम्।।[3]**

अन्यथा तु तस्य प्राप्तिः परमदुर्लभा वर्तते –

**'आत्मात्मजाप्तगृहवित्तजनेषुयस्य-**
**र्दुष्प्रापणाय गुणसंगविवर्जिताय।**
**मुक्तात्मभिः स्वहृदये परिभाविताय**
**ज्ञानात्मनो भगवते नम ईश्वराय।।'[4]**

स परमात्मा ज्ञानरूपः ज्ञानात्मा अर्थात् ज्ञानमेव आत्मा स्वरूपं यस्य स ज्ञानात्मा। एवञ्चोपनिषत्सु ब्रह्मविद्यासु तस्य गम्भीरनिरूपणं कृतमस्ति। तच्चात्र न वितन्यते।

श्रीमद्भागवते महापुराणे अनेके ज्ञानभक्ताः सन्ति। एतेषु गंगापुत्रभीष्मः, श्रीशुकदेवः, देवर्षिनारदः, विदुरः, उद्धवः, परमभागवतः प्रह्लादः, महर्षिमार्कण्डेयः, प्रचेताः, कुन्ती, सूर्यपुत्रकर्णः, अम्बरीषः, महर्षिशौनकादयः परमभागवताः सन्ति। यथोक्तं श्लोके केनचित् भक्तविदुषा –

**प्रह्लादनारदपराशरपुण्डरीक-**
**व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान्।**
**रुक्माङ्गदार्जुनवशिष्ठविभीषणादीन्**
**पुण्यानिमान् परमभागवतान् स्मरामि।**

श्रीमद्भागवतस्य प्रथमस्कन्धे परमभागवतस्य गंगापुत्रभीष्मस्य शान्तनोः राज्ञः गंगायां जातो देवव्रत इत्यपरनाम्ना सुविख्यातस्य पितुः प्रसन्नतायै त्यक्तसांसारिक-सुखस्य गृहीतभीष्मप्रतिज्ञस्य भरतवंशश्रेष्ठस्य स्वेच्छामृत्युवरदानप्राप्तस्य कुरुवंश-शिरोमणेः पावनं चरितं पुण्यकरं विस्तरेण निबद्धम् महाभारते। स परमज्ञानी अस्ति। भगवतो वासुदेवस्य स्वरूपं मायामानुषस्य स सम्यक्तया जानाति।[5] तयोर्मध्ये भक्तभगवतोः सम्बन्धः। महाभारतस्य युद्धसमाप्तेरनन्तरं शरशय्यायां शयानं भगवता श्रीकृष्णेन सह पाण्डवाः सर्वे भ्रातरः ब्रह्मर्षयः राजर्षयश्च द्रष्टुं प्रणामाय च तत्रागच्छन् -

**तान् समेतान् महाभागानुपलभ्य वसूत्तमः।**
**पूजयामास धर्मज्ञो देशकालविभागवित्।।**

वरपञ्जरे शयानं भरतपुङ्गवं श्रीभीष्मं विविधान् धर्मान् प्रपृच्छ। धर्मं प्रवदन् स मृत्यवे वांछितमुत्तरायणं कालं प्रत्युपस्थितं विज्ञाय गिरं स्वकीयां संहत्यादिपुरुषे वसुदेवे विमुक्तसंगं मनः ददौ तथा च जनार्दनं तुष्टाव -

**तदोपसंहृत्य गिरः सहस्रणी**
**विंमुक्तसङ्गं मन आदिपूरुषे।**
**कृष्णे लसत्पीतपटे चतुर्भुजे**
**पुरः स्थितेऽमीलितदृग्व्यधारयत्।।[6]**

अत्रैव महाभागवतो ज्ञानीभक्तोऽयं श्रीभीष्मः विष्णुं स्तौति। स्तोत्रेऽस्मिन् आदौ सगुणरूपस्य परमात्मनः दर्शनं भवति ततः ज्ञाननिष्ठस्य च यथाहि -

**स देवदेवो भगवान् प्रतीक्षतां**
**कलेवरं यावदिदं हिनोम्यहम्।**
**प्रसन्नहासारुणलोचनोल्लसन्**
**मुखाम्बुजो ध्यानपथश्चतुर्भुजः।।**
**त्रिभुवनकमनं तमालवर्णं रविकरगौरवाम्बरं दधाने।**
**वपुरलकमुलावृताननाब्जं**
**विजयसखे रतिरस्तु मेऽनवद्या।।**

युधि तुरगोत्थितरजोविधूम्रकचलुलित-श्रमालङ्कृतमुखे मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचे कृष्णे मे आत्माऽस्तु। पुनश्च स्तौति -

**व्यवहितपृतनामुखं निरीक्ष्य**
**स्वजनवधाद् विमुखस्य दोषबुद्ध्या।**
**कुमतिमहरदात्मविद्यया**
**यश्चरणरतिः परमस्य तस्य मेऽस्तु।।[7]**

परमस्य तस्य परमात्मनः चरणरतिः आत्मविद्यया कुमतिं हरति। आत्मज्ञानं ज्ञानिनः लक्ष्यं भवति। कश्चायमात्मा, कुतः इति शास्त्रोक्तदिशा वारं वारं विचार्य ब्रह्मांशोऽयमेव नान्यः इति विज्ञाय जीवब्रह्मणोरैक्यमधि-गच्छति। कुमतिं असदि सद्भ्रान्तिः, जगदिदं क्षणभङ्गनिष्ठम् असत्यम् किन्तु सद्भावम् कुमतिः।

**तमिममहमजं शरीरभाजां**
**हृदि हृदि धिष्ठितात्मकल्पितानाम्।**
**प्रतिदृशमिव नैकधार्कमेकं**
**समधिगतोऽस्मि विधूतभेदमोहः।।[8]**

एवं स्तुत्वा ज्ञानभक्तिनिष्ठो भक्तोऽयं श्रीभीष्मः मनोवाग्दृष्टिवृत्तिभिः भगवति कृष्णे आत्मनि आत्मानम् आवेश्य अन्तः श्वासः उपारमत्।

श्रीमद्भागवतमहापुराणस्य विशिष्टप्रवाचकाः परमहंसपरिव्राजकशिरोमणयः वैराग्यमूर्तयः पाराशरसुताः ब्रह्मतत्त्वज्ञाः श्रीशुकदेवमुनयः ज्ञातभगवद्रहस्याः ज्ञानिभक्ताः वर्तन्ते। महापुराणेऽस्मिन् कथां श्रावयन् मुनिरदः स्थाने स्थाने भगवतः श्रीविष्णोः परमात्मनः स्तोत्रैः स्तौति, तेषु स्तोत्रेषु तस्य ज्ञानिभक्तत्वं स्पष्टतया परिलक्ष्यते यथा हि द्वितीयस्कन्दे राज्ञा परीक्षिता हरिगुणानुकथनाय सविनयमनुनीतः प्रोवाच –

**नमः परस्मै पुरुषाय भूयसे**
**सदुद्भवस्थानविरोधलीलया।**
**गृहीतशक्तित्रितयाय देहिना**
**मन्तर्भवायानुपलक्ष्य वर्त्मने।।**
**तपस्विनो दानपरा यशस्विनो**
**मनस्विनो मन्त्रसिद्धः सुमङ्गलाः।**
**क्षेमं न विन्दन्ति विना यदर्पणं**
**तस्मै सुभद्रश्रवसे नमो नमः।।**
**प्रचोदिता येन पुरा सरस्वती**
**स मे ऋषीणामृषभः प्रसीदताम्।**
**भूतैर्महद्भिर्य इमाः पुरो विभु-**
**र्निर्माय शेते यदमूषु पूरुषः।**
**भुङ्क्ते गुणान् षोडश षोडशात्मकैः**
**सोऽलं कृषीष्ट भगवान् वचांसि मे।।**[9]

एतेषु श्लोकेषु निर्गुणस्य च स्तुतिर्वर्तते परञ्च तेनैव सगुणस्यापि –

**स एष आत्माऽऽत्मवतामधीश्वर-**
**स्त्रयीमयो धर्ममयस्तपोमयः।**
**गतव्यलीकैरजशङ्करादिभि**
**र्वितर्क्यलिङ्गो भगवान् प्रसीदताम्।।**

अनेन प्रकारेण श्रीशुकमुनेः भगवत्स्तुतिः प्राप्यते तस्य च भगवत्तत्त्वनिरूपणप्रसङ्गेषु अनेकस्थलेषु स्तोत्राणि विद्यन्ते।

देवर्षिनारदोऽपि भगवतो ज्ञानिभक्तः। श्रीमद्भागवते श्रीनारदेन देवर्षिणोक्तानि स्तावकानि प्राप्यन्ते। द्वितीयस्कन्धस्य सप्तमाध्याये स्वयं भगवान् ब्रह्मा नारदमुनिं श्रीवासुदेवावतारकथाः श्रावयन् निगदति –

**तुभ्यं नारदभृशं भगवान् विवृद्ध-**
**भावेन साधुपरितुष्ट उवाच योगम्।**
**ज्ञानं च भागवतमात्मसतत्त्वदीपं**
**यद् वासुदेवशरणाविदुरञ्जसैव।।**[10]

अर्थात् परितुष्टो भगवान् स्वयमेव नारदाय देवर्षये योगं ज्ञानं भागवतं प्रोवाच। ध्रुवप्रह्लादादिभक्तेभ्यः उपदेशकाले नारदस्य ज्ञानिभक्तत्वं सेसिद्ध्यते। यथाहि –

**मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मनि।**
**न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना।।**
**धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेयमात्मनः।**
**एकमेव हरेस्तत्र कारणं पादसेवनम्।।**[11]

स परमात्मा तीव्रयोगसमाधिनापि दुर्लभतया एव प्राप्यः। तस्य चरणसेवनं चतुर्वर्गप्राप्तेरेकं सुसिद्धं कारणं वर्तते। अपरत्र चापि देवर्षिनारदोक्तवचनानि यथाहि –

**यथा तरोर्मूलनिषेचनेन**
**तृप्यन्ति तत्स्कन्धभुजोपशाखाः।**
**प्राणोपहाराश्च यथेन्द्रियाणां**
**तथैव सर्वार्हणमच्युतेज्या।।**
**यथैव सूर्यात् प्रभवन्तिवारः**
**पुनश्च तस्मिन् प्रविशन्ति काले।**

**भूतानि भूमौ स्थिरजङ्गमानि**
**तथा हरावेव गुणप्रवाहः ।।**
**यथा नमस्यभ्रतमः प्रकाशा**
**भवन्तिभूपा न भवन्त्यनुक्रमात्।**
**एवं परे ब्रह्मणि शक्तयस्तवभू**
**रजस्तमः सत्त्वमिति प्रभावः ।।**[12]

एवमेव स्वाश्रमस्थां कयाधुं हिरण्यकशिपोः पत्नीं देवराजबन्धनमुक्तां गर्भस्थं प्रह्लादं चोपदिशन् देवर्षिनारदो वदति -

**आत्मा नित्योऽव्ययः शुद्धः एकः क्षेत्रज्ञ आश्रयः।**
**अविक्रियः स्वदृग् हेतुर्व्यापकोऽसङ्ग्यनावृतः ।।**
**स्वर्णं यथा ग्रावसु हेमकारः**
**क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात्।**
**क्षेत्रेषु देहेषु तथात्मयोगै-**
**रध्यात्मविद् ब्रह्मगतिं लभेत ।।**
**तस्मात् भवद्भिः कर्त्तव्यं कर्मणां त्रिगुणात्मनाम्।**
**बीजनिर्हरणं योगः प्रवाहोपरमो धियः ।।**[13]

तं परमात्मानं सेवितुं भजनाय जीवः सर्वथा यत्नं कुर्यात् यतोहि तद्भजनादेव जन्ममृत्योः बन्धनं नश्यति, संसारचक्रः समाप्यते -

**तदा पुमान् मुक्तसमस्तबन्धन-**
**स्तद्भावभावानुकृताशयाकृतिः।**
**निर्दग्धबीजानुशयो महीयसा**
**भक्तिप्रयोगेण समेत्यधोक्षजम् ।।**
**अधोक्षजालम्भमिहाशुभात्मनः**
**शरीरिणः संसृतिचक्रशातनम्।**
**तद्ब्रह्मनिर्वाणसुखं विदुर्बुधा-**
**स्ततो भजध्वं हृदये हृदीश्वरम् ।।**[14]

अनेन प्रकारेण देवर्षिनारदस्य ज्ञानिभक्तमखः सुतरां स्फुटीभवति। एवमेव सनकादि ऋषयः ज्ञाननिष्ठाः कुमाराः ब्रह्मणः मानसपुत्राः स्तुवन्ति भगवन्तम् -

**तं त्वां विदाम भगवन् परमात्मतत्त्वं**
**सत्त्वेन सम्प्रति रतिं रचयन्तमेषाम्।**
**तत्तेनुतापविदितैर्दृढभक्तियोगै-**
**रुद्रन्थयो हृदि विदुर्मुनयो विरागाः ।।**
**नात्यन्तिकं विगणयन्त्यपि ते प्रसादं**
**किन्त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते।**
**येऽङ्गत्वदङ्घ्रिशरणा भवतः कथायाः**
**कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ।।**[15]

प्रचेतसां स्तवकेषु अपि ज्ञाननिष्ठायाः भक्त्याः सद्भावे दृश्यते। ते श्रीहरिं स्तुवन्तः शुद्धशान्तस्वरूपं स्तुवन्ति -

**शुद्धाय शान्ताय नमः स्वनिष्ठया**
**मनस्यथार्थं विलसद्द्वयाय।**
**नमो जगत्स्थानलयोदयेषु**
**गृहीतमायागुणविग्रहाय ।।**
**यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः।**
**तावद् भवत्प्रसंगानां सङ्गः स्यान्नो भवे भवे ।।**
**तुलयामः लवेनापि न स्वर्गं नापुनर्भवम्।**
**भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ।।**[16]

अस्मिन् संसारे भगवत्मायाप्रभाववशाद् कर्मभिः यावत् भ्रमामः तावत् त्वदीयप्रसंगानां भवे भवे प्रत्येकं जन्मनि सङ्गः स्यात्।

महात्मा विदुरोऽपि ज्ञानिभक्तः अस्ति। स परमात्मतत्त्वज्ञो वर्तते जनार्दनस्य भगवतः श्रीविष्णोः अवताराः शिष्टानामनुग्रहाय दुष्टानां निग्रहाय च भवति -

**'जनस्य कृष्णाद् विमुखस्य दैवा-**
**दधर्मशीलस्य सुदु:खितस्य।**
**अनुग्रहायेह चरन्ति नूनं**
**भूतानि भव्यानि जनार्दनस्य।।'**[17]

स मैत्रेयं प्रार्थयति यत् विश्वस्थितिनिरोधकस्य श्रीवासुदेवस्य अलौकिककर्माणि कथय, येन समग्रदु:खानां नाशो जायते -

**स विश्वजन्मस्थितिसंयमार्थे**
**कृतावतार: प्रगृहीतशक्ति:।**
**चकार कर्माण्यति पौरुषाणि**
**यत्नीश्वर: कीर्तय तानि मह्यम्।।**[18]

महात्मा विदुर: महाभारतपात्रेषु प्रमुखतम:। स महाभागवतस्य गंगापुत्रभीष्मस्य पट्टशिष्य: वेत्ता वेदितव्यानाम् अध्येता अधीतव्यानाम् च। भगवति श्रीविष्णौ तस्य स्थिरमति: वर्तते।

अस्मिन्नेव क्रमे परमभागवतस्य श्रीप्रह्लादस्य स्तवकानि अपि उदाहरणानि सन्ति। स देवर्षिनारदेन बोधित: दैत्यवंश्य: श्रीहरिचरणारविन्दस्थिरमति: भागवतश्चास्ति। तस्य स्तवकेषु ज्ञानानि भक्तभाव: स्पष्टतया परिलक्ष्यते। यथाहि नरहरिं तोषयितुं प्रार्थयति -

**मन्ये धनाभिजनरूपतप: श्रुतौज-**
**स्तेज: प्रभावबलपौरुषबुद्धियोगा:।**
**नाराधनाय हि भवन्ति परस्य पुंसो**
**भक्त्या तुतोष भगवान् गजयूथपाय।।**

तस्य परमात्मन: प्रीतये केवला भक्ति: समर्था नान्ये उपाया :-

**एकस्त्वमेव जगदेतदमुष्य तत्त्व-**
**माद्यन्तयो: पृथगवस्यसि मध्यतश्च।**
**सृष्ट्वा गुणव्यतिकरं निजमाययेदं**
**नानेव तैरवसितस्तदनुप्रविष्ट:।।**[19]

भक्तप्रह्लादस्य स्तुतिं श्रुत्वा प्रीतो भगवान् नृसिंह वरयाचनाय कथयति। तदा प्रह्लादस्य याचना ज्ञानिभक्तस्य योग्या एव वर्तते -

**'यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ।**
**कामानां हृद्यसंरोहं भवतस्तु वृणे वरम्।।'**[20]

वरान् त्वं रासीश तर्हि मे हृदि कामानाम् असंरोहं भवत: याचे। अर्थात् हृदये कामानां संरोह: उद्भव एव न स्यात् यतोहि कामसंदोहात् संकल्पविकल्पाभ्यां कर्मोत्पत्ति: तेन कर्मणा पुनरपि जननं पुनरपि मरणं जायते।

स प्रार्थयति -

**इन्द्रियाणि मन: प्राण आत्मा धर्मो धृतिर्मति:।**
**ह्री: श्रीस्तेज: स्मृति: सत्यं यस्य नश्यन्ति जन्मना।।**
**विमुञ्चन्ति यदा कामान् मानवो मनसि स्थितान्।**
**तर्ह्येण पुण्डरीकाक्ष भगवत्त्वाय कल्पते।।**[21]

भक्त: वदति यत् मनसि स्थितान् कामान् यदा मानव: विमुञ्चति तदेव स भगवत्त्वाय कल्पते।

श्रीमद्भागवते उद्धव: भगवत् प्रियो ज्ञानिभक्त: अस्ति। तस्य स्तवकेषु सतत् स्पष्टं भवति। उद्धवविषये श्रीशुकदेवपादा: एवं वदन्ति -

**वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयित: सखा।**
**शिष्यो बृहस्पते: साक्षादुद्धवो बुद्धिसत्तम:।।**
**तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित्।**
**गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरि:।।**[22]

अनेन श्लोकयुगलेन सिद्ध्यति स भगवत: प्रियो

भक्तः। व्रजं गत्वोद्धवमहोदयः यशोदांनन्दं च शीघ्रमेकं वासुदेवस्य तत्रागमनस्य विषये आश्वासनं ददाति तस्मिन् प्रसंगे उद्धवकृतस्तवकम् आयाति -

**यतौ हि विश्वस्य च बीजयोनी**
**रामो मुकुन्दः पुरुषः प्रधानम्।**
**अन्वीय भूतेषु विलक्षणस्य**
**ज्ञानस्य चेशात इमौ पुराणौ।।**

इमौ रामकृष्णौ विश्वस्य बीजयोनी, पुराणौ पुरुषौ, जगत् स्थितिसंहारहेतू चास्तः। प्राणान्तकाले क्षणं समावेशयति मनसि यः श्रीहरिं कृष्णं स शीघ्रतया एव कर्मपाशाद् विमुञ्चति -

**यस्मिन् जनः प्राणवियोगकाले**
**क्षणं समावेश्य मनो विशुद्धम्।**
**निर्हृत्य कर्माशयमाशु याति**
**परां गतिं ब्रह्ममयोऽर्कबाणः।।**

उद्धवः श्रीनन्दं यशोदां मातरं च संबोधयति यत् तस्य वासुदेवस्य न कश्चित् प्रियः नाप्रियः, न जन्म न मृत्युः, न हि कर्मबन्धनम् -

**न माता न पिता तस्य न भार्या न सुतादयः।**
**नात्मीयो न परश्चापि न देहो जन्म एव च।।**
**न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु।**
**क्रीडार्थः सोऽपि साधूनां परित्राणाय कल्पते।**

अस्मिन् स्तवके उद्धवस्य ज्ञानिभक्तभावः समुच्छलति। एवमेव नैकस्थलेषु ऋषिगणैः कृतायां स्तुतौ, मार्कण्डेयमुनिस्तबके, श्रीरुद्रकृतप्रार्थनायां च ज्ञानात्मकस्यपरमात्मनः श्रीविष्णोः तत्त्वं निरूपितं वर्तते। ज्ञानिभक्ताः तस्य परमात्मनः चिद्रूपं ध्यायन्ति यथाहि -

**'ब्रह्म ते हृदयं शुक्लं तपः स्वाध्यायसंयमैः।**
**यत्रोपलब्धं सद् व्यक्तमव्यक्तं च ततः परम्।।**
**तस्माद् ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः।**
**सभाजयसि सद्धाम तद् ब्रह्मण्याग्रणीर्भवान्।।'[23]**

एवं चास्मिन् आलेखे आर्तजिज्ञासु-अर्थार्थिज्ञानिभिः भक्तवरैः कृतानां स्तवकानां विश्लेषणात्मकं परिशीलनम् कृतम् अस्ति।

**- शोधार्थी,**
**ज.रा.राजस्थान-संस्कृतविश्वविद्यालयः, जयपुरम्**

1. श्रीमद्भागवते - ३/२१/१५
2. तत्रैव - ४/७/४९
3. तत्रैव - ८/३/२७
4. तत्रैव - ८/३/१८
5. कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम्। हृदिस्थं पूजयामास माययोपात्तविग्रहम्।।१ ९/१०
एष वै भगवान् साक्षादाद्यो नारायणः पुमान्। मोहयन् मायया लोकं गूढश्चरति वृष्णिषु।।१ ९/१३
6. श्रीमद्भागवते १/९/३१
7. तत्रैव - १/९/३१
8. श्रीमद्भागवते - १-९-४२
9. तत्रैव - २/४/१३, १७,२३,२३
10. तत्रैव - १/७/१३
11. श्रीमद्भागवते - ४/८/३१, ४१
12. तत्रैव - ४/३१/१४,१५,१७
13. तत्रैव - ७/७/१९,२१,२८
14. तत्रैव - ३/७/३६-३७
15. तत्रैव - ३/१५/४७-४८
16. श्रीमद्भागवते -४/३०/२३,३३,३४
17. तत्रैव - ३-५-३
18. तत्रैव - ३/५/१६
19. तत्रैव - ७/९/३०
20. तत्रैव - ७/१०/७
21. श्रीमद्भागवते -७/१०/८-९
22. तत्रैव - १०/४६/१-२
23. तत्रैव - १०/८४/१३-२०

# छन्दोबद्धगज़लकाव्यस्तबकः

❑ डॉ. हर्षदेवमाधवः

### ( ५ ) तमः ( वियोगिनी )

शिवमूर्ध्नि चन्द्रलेखया द्युतिक्रोडे ननु रक्ष्यते तमः।
गिरिशेन च कण्ठलाञ्छने रहसि पश्य विभूष्यते तमः।।

मलिनञ्च दरिद्रतां गतं नितरां क्षाममुखं दिगम्बरम्।
कुटीरात् कुटीरं प्रयाति किं द्युतिरेखां निशि याचते तमः।।

प्रलये गहने परात्परे शशिसूर्यौ न नभो न तारकाः।
निरवद्यं ननु शिष्यते तदा प्रभविष्णु नितरां तमः।।

शशिना धवले चराचरे द्युतिदीव्ये धरणौ पलायितम्।
तरुभिस्स्वतलेषु चौरवन्निजक्रोडेषु निगूह्यते तमः।।

वचनेषु प्रसन्नमुद्रया शुचिता सज्जनता च दक्षता।
खलदुष्टजनस्य मानसैः सदयैरेव सुगोप्यते तमः।।

दुरितैर्निशिचारिणां गणैः रहसि भ्रातृजनैर्विवर्धितम्।
तमसो बलवत्तरं मुदा ह्यशुभं हन्त! वितन्यते तमः।।

### ( ६ ) 'अस्ति' गज़लस्तोत्रम्

सदा सृष्टिप्रपञ्चे जायमानं लीलया 'अस्ति'।
पुनर्जातं प्रनष्टं स्पन्दमानं स्वेच्छया 'अस्ति'।।

परात्परदेवतास्तित्वस्य बोधे राजते 'अस्ति'।
'अमीबा' जीवकोषे जीवितांशे वर्तते 'अस्ति'।।

गिरौ नद्यां समुद्रे व्योम्नि पृथ्व्यां विस्तृतम् 'अस्ति'।
सदा देवालयेषु प्रार्थनायां संस्तुतम् 'अस्ति'।।

रहस्यान्नासदीयात्केन सृष्टं चञ्चलम् 'अस्ति'।
न लब्धं मायया हीनं कदाचिदच्छलम् 'अस्ति'।।

सुषुप्तं मृत्तिकागर्भे भुवौ बीजाङ्कुरे 'अस्ति'।
क्वचित् पीताम्बरे वा राजते चर्माम्बरे 'अस्ति'।।

समाधौ निर्विकल्पे ध्यानगर्भे रिक्तता 'अस्ति'।
महाशून्ये स्वक्रोडेऽव्याहता सा पूर्णता 'अस्ति'।।

- ८, राजतिलक बंगलोज़,
ममता हॉस्पिटल के सामने,
आबादनगर बस स्टॉपसमीप, बोपल,
अहमदाबाद-३८००५८
मो. ९४२७६ २४५१६, ७८७४५ ३२२२५

पुस्तक-समीक्षा

# अभिराजकथासङ्ग्रहः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

विद्वन्मूर्धन्यः कविसार्वभौमः काशिक संस्कृतविश्वविद्यालयकुलपतिचरो महामहोपाध्यायः पद्मालङ्करणसभाजितो राष्ट्रपतिसम्मानितश्च प्रो.अभिराजराजेन्द्रमिश्रः शिखरस्थः कवितल्लजोऽस्तीति जानन्ति संस्कृतसेवकाः, स शिखरस्थः कथाकारोऽप्यस्तीति विदितं स्यात् संस्कृतजगति। 'इक्षुगन्धा' 'राङ्गड़ा' चित्रपर्णी, पुनर्नवा-छिन्नमस्ता शीर्षकवहाः कथासङ्ग्रहाः कविवर्यस्यास्य प्रकाशित-चराः। सपद्येव षष्ठः कथासङ्ग्रहोऽपि प्रकाशमाप्तः 'वाडवाग्नि' शीर्षकः। कथासङ्ग्रहेऽस्मिन् एकादश सामाजिकाः कथाः सन्ति सङ्कलिता यासु अष्टसंख्याकाः सर्वप्रथमतया प्रकाश्यन्ते, तिस्रः पूर्वप्रकाशितेषु सङ्ग्रहेष्वप्यासन् मुद्रिताः। सङ्कलनस्याऽस्य सम्पादकोऽस्ति अभिराजशिष्यो वरिष्ठो विद्वान् केन्द्रीयविश्वविद्यालये (बिहारस्थे) सहाऽऽचार्यः प्रो. डॉ.अनिलप्रतापगिरिः।

पुस्तकस्य मुखपृष्ठे सहशीर्षके घोषितमस्ति यदस्मिन् 'भाषान्तरप्रतिस्पर्धिन्यो मर्मोद्घाटिन्यः कथानिकाः' सन्ति संगृहीताः। एतस्याऽऽशयः स्पष्टीकरोति यत् संस्कृते पौराणिक्यः कथाः सुप्रचलिताः सन्ति, सामाजिकाः कथाः, वर्तमानस्थितीः परिदर्शयन्त्यः कथा अल्पीयस्य एव। सङ्ग्रहेऽस्मिन् समाजस्य स्थितीः परिदर्शयन्त्यः कथाः सन्ति तादृश्यो या हिन्दी-बांग्ला-मराठी प्रभृति भाषासु, आङ्गलभाषायां च विलिख्यन्ते, पत्र-पत्रिकासु प्रकाश्यन्ते च। अत्र सङ्कलिताः कथा वर्तमान-भारतीय-समाजस्य दर्पणभूताः कथयितुं शक्यन्ते। 'रक्षाबन्धनम्' 'गृहदेवता' 'नर्तकी' 'सपत्नी' इत्यादयः कथा वर्तमानं भारतीयसमाजं दर्पणवच्चित्रयन्तीति पाठका अनुभवेयुः।

सङ्ग्रहस्य शीर्षकमत्र सङ्कलिताया अन्तिमकथायाः शीर्षकमेवाऽस्ति। सेयमपि सरणिराधुनिकी यत् काव्यरचनासङ्ग्रहस्य वा शीर्षकं तत्र परिगृहीतायाः काव्यरचनायाः कथाया वा शीर्षकमादाय निर्मीयते। अन्तिमा कथाऽस्ति 'वाडवाग्निः'। इदमेव शीर्षकमस्ति सङ्ग्रहस्याऽपि। नाऽत्र वाडवाग्नेः किञ्चिदपि वर्णनम्। इयं कथाऽपि समाजे परिघटमानानां स्थितीनामाकलनाय सृष्टा किन्तु नाऽत्र सामान्याः स्थितयः कथानके विशिष्टा, असामान्याश्च घटना यदि प्रस्तूयन्ते तदैव हृदयमावर्ज्यते पाठकानाम्। एकस्य श्रेष्ठिवर्यस्य सर्वात्मना समुज्वलः सच्चरित्रः सुबरननामा सेवको मिथ्याऽऽरोपकारणान् कारावासे तिष्ठति किन्तु कथं सच्चारित्रता तस्य प्रशस्यते, तस्य पुत्रो जयेन्द्रः 'जित्तू' 'श्रेष्ठिगृहे स्वीक्रियते। कारावासे सच्चरित्रतायाः कारणात् सुबरनः 'सुबरनसाधुः' प्रसिध्यति, तदवधेरनन्तरं यदा स कारागारतः प्रत्यावर्तते तस्य हृदये निर्दोषस्यापि दण्डनोत्थो यः कोपो भवति स सहसा ताः स्थितीरवलोक्य कथं शक्यतीति चित्रितं कथानके। कोपस्य वाडवाग्निः कथं शाम्यतीति 'वाडवाग्नि'-शीर्षकस्याऽऽशयस्तदा स्पष्टीभवति।

सामाजिकीष्वेतासु कथासु सर्वविधानां वर्गाणां चित्रणमस्ति। न खलु वर्गविशेषस्य गौरवख्यापनं, राजनयिकी वा काचन दृष्टिः परिलक्ष्यते। एकस्यां कथायां हुस्नाबाईत्याख्या नर्तकी ब्राह्मणकन्यामेकां मुस्लिमनाम्ना पालयति, 'कमरजहाँ' इत्याख्यया, किन्त्वन्ततस्तस्याः परिणयं ब्राह्मणयुवकेन सह कारयति। युगस्यास्य स्थितीनां रञ्जकमाकर्षकं च वर्णनं कुर्वन्तीनां कथानामयं सङ्ग्रहः आधुनिकसंस्कृतसाहित्येतिहासे सादरमुल्लेख-नीयोऽस्तीति स्पष्टमेव। आधुनिकस्थितीनां वर्णनाय

कतिपये नूतनाः शब्दाः संस्कृतेऽपेक्ष्यन्ते एव। एवंविधानां स्थितीनां कृते कतिपये शब्दा नूतनया कथाकारेण प्रयुक्ता इत्याख्यायन्ते परिशिष्टरूपेणैका सूची ग्रन्थेऽस्मिन् मुद्रिता 'आत्मनिर्मितशब्दाः' शीर्षकेण। अत्र सङ्कलिताः शब्दाः पूर्वतना एव किन्तु नूतनतया परिदृश्यन्ते अतः 'आत्मनिर्मिताः' (Self-coived) इत्याख्याताः, यथा 'घूसखोर' इत्यस्य कृते 'उत्कोचजीवी' 'सँभाला' इत्यस्य कृते 'सम्भालितवान्' 'पुलिसथाना' इत्यस्य कृते 'रक्षिस्थानकम्' पैलगी (पैर लगना) इत्यस्य कृते 'पादलग्निका'।

इत्थमेव द्वितीये परिशिष्टे कतिपयास्तादृश्योऽभिव्यक्तयः 'सुभाषित-वाक्यानि' शीर्षकेण परिभाषिता याः समुद्धरणीयाभिव्यक्तिरूपेण मानसं प्रभावयन्ति यथा 'तालध्वनिरेकेनैव करतलेन न सम्भवति', (हिन्दीभाषायामिदं 'एक हाथ से ताली नहीं बज सकती' इति रूपेणोदीर्यते)।

कविमूर्धन्यस्य प्रतिष्ठितकथाकारस्य चाऽस्य विद्वत्प्रवरस्य नूतनं प्रकाशनमिदं सस्वागतं वर्धाप्यते।

**वाडवाग्निः** (कथासङ्ग्रहः) कथाकारः- कविसार्वभौमः मिश्रोऽभिराजराजेन्द्रः, **सम्पादकः-** केन्द्रीयविश्व-विद्यालये सहाचार्यः प्रो. डॉ. अनिल-प्रतापगिरिः, **प्रकाशकः-** वैजयन्तप्रकाशनम्, प्रयाराज, पृ.सं. 112, मूल्यम् 400/-

# बालशिक्षायै पद्यरचना

बालानां नैतिकशिक्षार्थं यथा लघुकथा उपलभ्यन्ते तथैव सरलेषु पद्येषु तेषां कृते सरला नैतिक-शिक्षा यदि प्रदीयते तर्हि सोऽपि बालशिक्षाया नवः प्रकारः सिध्येत इत्यवधार्य सुप्रथितेन विदुषा गुजरात-विश्वविद्यालये संस्कृतविभागाध्यक्षेण तत्र भाषा-साहित्यभवनस्य निदेशकपदमपि धारयता प्रो. कमलेशकुमार छ. चोकसीवर्येण सरलेषु अनुष्टुप्छन्दोबद्धेषु पद्येषु बालानां कृते नैतिकशिक्षाया यानि पद्यानि व्यरच्यन्त तेषां सङ्कलनं 'पद्यप्रसादः' इति शीर्षवहे पुस्तके सद्य एव प्रकाशितमस्ति। चतुर्विंशति (24) पाठेषु निबद्धा इमाः शिक्षाः प्रतिपाठं 20, 25, 35 पद्येषु विभिन्नविषयकान् सरलोपदेशान् निबध्नन्ति यथा संस्कृतादिभाषाणामभ्यासः कथं कार्य इत्यस्य कृते 27 पद्येषु सोऽयमुपदेशः संनिबद्धो यत् कथं कोशव्याकरणादिसाधनया, भाषणाभ्यासेन च भाषाशिक्षा प्राप्तुं शक्यते (त्वं वाञ्छसि यदि वक्तुम्)। इत्थं विविधमार्गदर्शनपराः पाठाः 'किं नाम व्यसनं प्रोक्तम्' 'लाभे यत्नं समाचर' 'ज्ञानं न जयति देशः' इत्यादिशीर्षकैः प्रस्तुता अत्र।

सरलया भाषया, व्याकरणस्य छन्दसश्च बन्धनेभ्यो विनिर्मुच्य धाराप्रवाहप्रकृत्या निबद्धानामेषामनुष्टुप्छन्दोबद्धानां पद्यानां प्रस्तुतिः प्रतिपद्यं तेषां हिन्दीभाषानुवादेन सह मुद्रिताऽस्ति। कतिचन पाठाः बालक-दीपकसंवादरूपेण गुरुशिष्यसंवादरूपेण वा प्रस्तुताः सन्ति। पुरोवाग्रूपेण आचार्य मिथिलाप्रसाद-त्रिपाठिनः शुभाशंसाऽपि तथैव हिन्दीभाषानुवाद-सहितेष्वनुष्टुप्पद्येषु मुद्रिताऽस्ति, अन्येषामपि शुभाशंसाः प्रारम्भे मुद्रिताः।

**पद्यप्रसादः** (बालोपयोगी पद्यात्मकरचना), कविः- प्रो. कमलेशकुमार छ. चोकसी, **सम्पादिका-** डॉ. मालती राघव, **प्रकाशक-** विद्यानिधि प्रकाशन, डी 10/1061, खजुरी-खास, दिल्ली, पृ.सं. 163, मूल्यम् 95/-

नारी-स्तम्भः

# मृताप्यमृता लता

❑ डॉ. राजेश्वरी भट्टः

सप्तदशकेभ्य आत्मनो मधुरेण स्वरेण गीयमानैः नवरससिक्तैर्गीतैः निखिलं विश्वं तन्मयं कुर्वती, लोके स्वरसाम्राज्ञीरूपेण प्रतिष्ठिता, संगीतविशारदा, 92 वर्षीया लतामंगेशकरमहाभागा 6 फरवरी 2022 तमे दिनाङ्के दिवं प्रयाता। राष्ट्रस्य सर्वोच्चेन 'भारतरत्न' इति सम्मानेन सम्मानिताया अपूर्वायाः स्वरसाधिकाया निधनं न केवलं राष्ट्रस्य कृते अपितु अखिलस्य ब्रह्माण्डस्य कृते अपूरणीया क्षतिः विद्यते। सप्तद्वीपेषु लतायाः प्रशंसकाः शोकसन्तप्ता अदृश्यन्त। भारतसर्वकारेण स्वरकोकिलाया निधने त्रिदिवसानां कृते राष्ट्रीयशोको घोषितः। राष्ट्रस्य प्रधानमन्त्री 'श्रीनरेन्द्रमोदी' स्वरदेव्यै सुमनाञ्जलिं समर्पयितुं स्वयं मुम्बई नगरं गतवान्। राष्ट्रे संगीत-चलचित्र-शिक्षा, साहित्य क्रीड़ादिषु क्षेत्रेषु जनाःशोक मग्ना जाताः। आत्मनो विशिष्टेन संगीतनैपुण्येन लोकं सम्मोहयन्ती अनन्या स्वरसाधिका 'लता' 28 सितम्बर 1929 तमे वर्षे 'महाराष्ट्रप्रदेशे' संगीतसाधकानां तपोभूम्यां इन्दौर - नगर्यां जनिमलभत। अपूर्वस्वर साधिकाया लतायाः पिता पं. दीनानाथमंगेशकर इन्दौरनगरे उत्कृष्टसंगीतज्ञः सहैव कुशलोऽभिनेता आसीत्। नित्यं संगीतसाधना, संगीतस्य प्रशिक्षणञ्च पण्डितमहाभागस्य दैनन्दिनी आसीत्। मन्ये यत् उत्तराया गर्भे अभिमन्युरिव मातुर्गर्भे स्थिता 'लतामहाभागा' संगीतसाधनाकाले पितुर्मुखाद् गीयमानानां सप्तस्वराणां आरोहण-अवरोहणक्रमं श्रुत्वा जन्मनः पूर्वमेव संगीतस्वरैः सुपरिचिता जाता। सततं संगीतपरिवेशे वर्त्तमाना लतामंगेशकरमहाभागा बाल्यादेव संगीतविद्यां प्रति सहजेनैव समाकृष्टा जाता। पञ्चवर्षस्य वयस्येव पितुः सान्निध्ये संगीतस्य अभ्यासो लताया नित्यक्रमोऽवर्तत। दौर्भाग्येन 1942 तमे वर्षे लतामंगेशकर महोदयायाः पितुर्निधनं जातम्। तदानीं त्रयोदशवर्षस्य वयस्येव ज्येष्ठायाः पुत्र्या लतामंगेशकर - महाभागायाः स्कन्धयोर्महद्दुःखमापतितम्। गृहे वर्तमानानां पञ्चजनानां परिवारस्य दायित्वं निर्वहन्त्या 'लतायाः' नैजिकं जीवनं कदा, कथञ्च व्यतीतं इति तु न जाने किन्तु संघर्षेषु अग्रेगच्छन्ती 'लतामंगेशकर' महोदया शाणोल्लिखित-मणिरिव तेजोमयी जाता। सम्प्रति अभिनयकलां प्रति अनुत्सुकाऽपि आर्थिककारणैर्विवशा लतामंगेशकर महाभागा मराठी एवं हिन्दी चित्रपटानां कृते अभिनयं कृतवती। 1942 तमे वर्षे प्रख्यात - संगीतकारः **सदाशिवनेवरेकरः** लता - महाभागयाः कण्ठस्वरं उत्तमगायनस्य कृते अतिमन्दं मन्यमानः तस्यै गानस्यावसरं न प्रदत्तवान्। ततो गायनविद्यायां नैपुण्यमधिगन्तुं संगीतकलायै समर्पिता 'लतामंगेशकर' महोदया मुम्बई- नगरं आगतवती। अत्र सा संगीतक्षेत्रे लब्धप्रतिष्ठितस्य, उस्तादअलीखानस्य निर्देशने भारतीय शास्त्रीयसंगीतस्य प्रशिक्षणमधिगतवती। शनैः शनै राष्ट्रे प्रसिद्धानां संगीतविशारदानां सम्पर्केण लता महाभागाया व्यक्तित्वं कर्तृत्वं च सुविकसितं जातम्। यदा कदा गायनविद्याप्रवीणाया नूरजहाँ, शमशाद बेगम सदृशीनां गायिकानां गीतेषु उर्दूभाषायाः प्रयोगेण प्रभावेण च आकर्षिता मराठी भाषाभाषिणी 'लता महाभागा' उर्दू एवं हिन्दीभाषाया अभ्यासेन उच्चारणपरिवर्तनं कृतवती। सततं अभ्यासेन आत्मनो मधुरेण स्वरेण च 'लता' महाभागा लोके शीर्षस्था पार्श्वगायिकारूपेण

मान्याऽभवत्। सम्प्रति शंकर-जयकिशन-सचिनदेवब्बर्मन-नौशाद-लक्ष्मीकान्तप्यारे-लाल-कल्याणजी, आनन्द जी सदृशा उत्कृष्टा संगीतनिर्देशका उत्कृष्टपार्श्वगायिकाया लतामहाभागाया गीतैः लोकप्रियतां प्राप्तवन्तः। लता महाभागया 36 भाषासु गीयमानानि सर्वाणि गीतानि मधुराणि रसमयानि च सन्ति। किन्तु तेषामपि 'आयेगा आने वाला' 'ऐ मेरे वतन के लोगों' 'ज्योति कलश छलके' 'सत्यं शिवं सुन्दरम्' सदृशानि गीतानि युगयुगेभ्यः स्मरणीयानि सन्ति। 1962 तमे वर्षे असाधारणगायिकाया 'लताया' कीर्त्या असूयको कोऽपि असहिष्णुः तस्याः प्राणान्हर्तुं तस्यै विषं प्रदत्तवान् किन्तु दैवात् स दुर्बुद्धिः विफलो जातः। अलौकिक गायनकलायाः कृते लता महाभागा महाराष्ट्र, बंगाल, गुजरात प्रदेशेभ्योऽपि च विदेशेभ्योऽपि विशिष्टैः सम्मानैः सम्मानिता जाता। तेष्वतिविशिष्टाः पुरस्कारा अत्रोल्लेखनीयाः सन्ति। (1) 1989 – दादा साहब फाल्के सम्मानः (2) 1999 – पद्मविभूषणसम्मानः, (3) 2001 – भारतरत्नसम्मानः।

संगीतादतिरिक्तं क्रीड़ा, समाजसेवा, भ्रमणं, पाककला इत्यादिभिः गुणैः बहुमुखी प्रतिभासम्पन्ना 'लता' महोदया प्रशंसकैः कृष्ण की बासुरी, स्वर्ग की देवी, साक्षात् सरस्वती, न भूतो न भविष्यति, राष्ट्रीय संस्कृति की राजदूत इत्यादिभिः श्रद्धासूचकैः उपाधिभिः प्रशस्ता जाता। अस्माकं राष्ट्रस्य विशिष्टा विभूति अस्माकं मध्ये नास्ति किन्तु तया गीयमानानां सहस्राणां गीतानां मधुरो ध्वनिः युगयुगेभ्यो जनमनांसि सन्तर्पयिष्यति।

---

## हिन्दी अनुवाद

सात दशकों तक अपने मधुरस्वर से गाए हुए नवरस से सिक्त गीतों से सम्पूर्ण विश्व को तन्मय करने वाली, लोक में स्वरसाम्राज्ञी रूप से प्रतिष्ठित संगीत विशारदा, **लतामंगेशकर** अपनी आयु के 92 वर्ष व्यतीत कर 6 फरवरी 2022 को दिवंगत हो गई। राष्ट्र के सर्वोच्च 'भारतरत्न' सम्मान से सम्मानित अपूर्व स्वरसाधिका 'लता' जी का निधन न केवल राष्ट्र की अपितु निखिल ब्रह्माण्ड की अपूरणीया क्षति है। सप्तद्वीपों में लता जी के प्रशंसक शोकाकुल हैं। भारत सरकार ने 'लता' जी के निधन पर तीन दिन का राष्ट्रीय शोक घोषित किया है। राष्ट्र के प्रधानमंत्री '**श्री नरेन्द्र मोदी**' स्वरदेवी को पुष्पाञ्जलि समर्पित करने के लिए स्वयं मुम्बई पहुँचे थे। राष्ट्र में संगीत, चलचित्र, शिक्षा, साहित्य, क्रीड़ा आदि विभिन्न क्षेत्रों में लोग शोकमग्न हो गए। अपने विशिष्ट संगीत नैपुण्य से सबका मन मोहने वाली अनन्या स्वरसाधिका 'लतामंगेशकर' ने 28 सितम्बर 1929 में तत्कालीन महाराष्ट्र प्रदेश में संगीतसाधकों की तपोभूमि इन्दौर नगर में जन्म लिया। स्वरकोकिला 'लतामंगेशकर' के पिता पं. दीनानाथ मंगेशकर इन्दौर नगर में जाने माने संगीतज्ञ साथ ही कुशल अभिनेता के रूप में प्रसिद्ध थे। नित्य ही संगीत-साधना एवं संगीतप्रशिक्षण उनका दैनिक कर्म था। सम्भवतः उत्तरा के गर्भ में अभिमन्यु की भाँति माता के गर्भ में स्थित लतामंगेशकर भी अपने पिता के मुख से संगीतसाधना के अवसर पर गाए हुए सप्तस्वरों के आरोहण-अवरोहण क्रम को सुनकर जन्म से पूर्व ही संगीतस्वरों से सुपरिचित हो गई। संगीत के परिवेश में बढ़ती हुई लतामंगेशकर बाल्यावस्था से ही संगीत के प्रति आकर्षित हो गई। पाँच वर्ष की आयु से ही पिता से

संगीत का प्रशिक्षण लेना लता जी का नित्यक्रम था। दुर्भाग्य से 1942 ई. में लतामंगेशकर के पिता का निधन हो गया। उस समय तेरह (13) वर्ष की आयु में ही लता जी के कन्धों पर बड़ा भार आ गया। घर में स्थित पाँचों सदस्यों के परिवार का दायित्व वहन करते-करते लता जी का व्यक्तिगत जीवन कब व्यतीत हो गया यह तो ज्ञान नहीं किन्तु संघर्षों में आगे बढ़ती हुई 'लतामंगेशकर' शाणोल्लिखित मणि की भाँति तेजस्विनी हो गई। अभिनयकला के प्रति उदासीन होने पर भी आर्थिक कारणों से विवश लता जी ने मराठी एवं हिन्दी चित्रपटों में अभिनय किया। सन् 1942 में प्रख्यात संगीतकार 'सदाशिवनेवरेकर' ने 'लतामंगेशकर' के कण्ठस्वर को उत्तमगायन के लिए मन्द बताते हुए उन्हें गाने का अवसर प्रदान नहीं किया। 'लतामंगेशकर' ने तब गायनकला में अधिक निपुणता प्राप्त करने के लिए मुम्बई जाने का निश्चय किया। यहाँ लता जी ने संगीत क्षेत्र में प्रख्यात **'उस्ताद अमीन अली खान'** के निर्देशन में भारतीय शास्त्रीय संगीत का प्रशिक्षण प्राप्त किया। शनैः शनैः राष्ट्र में प्रसिद्ध संगीतकारों के सम्पर्क से लता जी का व्यक्तित्व एवं कर्त्तव्य निरन्तर विकसित हो गया। समय-समय पर नूरजहाँ एवं शमशादबेगम जैसी गायनविद्या में निष्णात गायिकाओं के गीतों में उर्दू भाषा के प्रयोग एवं प्रभाव से आकर्षित लतामंगेशकर ने उर्दू एवं हिन्दी भाषा का अभ्यास कर अपने उच्चारण में परिवर्तन किया। अपने मधुर स्वर एवं सतत संगीत अभ्यास से लतामंगेशकर संगीत क्षेत्र में शीर्षस्थ पार्श्वगायिका के रूप में प्रसिद्ध हो गई। राष्ट्र के लब्धप्रतिष्ठित शंकर-जयकिशन, सचिनदेव बर्मन-नौशाद, लक्ष्मीकान्त-प्यारेलाल, कल्याणजी-आनन्दजी जैसे उत्कृष्ट संगीत निर्देशकों ने लतामंगेशकर के गीतों के माध्यम से लोकप्रियता अर्जित की। स्वरदेवी 'लतामंगेशकर' के द्वारा 36 भाषाओं में गाए गए सभी गीत मधुर एवं रसमय हैं किन्तु उनमें भी **'आयेगा आने वाला' 'ऐ मेरे वतन के लोगों' 'ज्योति कलश छलके' 'सत्यं शिवं सुन्दरम्'** सदृश दिव्य गीत युगयुगों तक स्मरणीय एवं आनन्ददायक रहेंगे। 1962 ई. में असाधारण गायिका लतामंगेशकर की कीर्ति से ईर्ष्या करने वाले किसी असहिष्णु ने उनको मन्द विष देकर मारने का प्रयत्न किया, किन्तु भाग्य से वह दुर्बुद्धि अपने कुचक्र में विफल हो गया। अपनी अलौकिक गायन कला के लिए स्वरकोकिला लता जी महाराष्ट्र, बंगाल, गुजरात आदि अनेक प्रदेशों एवं विदेशों से सम्मानित हुई हैं। लतामंगेशकर द्वारा प्राप्त सम्मान परम्परा में से कुछ विशिष्ट सम्मान यहाँ उल्लेखनीय हैं - (1) 1989 - दादा साहब फाल्के सम्मान (2) 1999 - पद्मविभूषण सम्मान, (3) 2001 - भारतरत्न सम्मान।

संगीत के अतिरिक्त खेल, भ्रमण, पाककला आदि विषयों में भी प्रवीण बहुमुखी प्रतिभा सम्पन्ना लतामंगेशकर अपने प्रशंसकों के द्वारा कृष्ण की बाँसुरी, स्वर्ग की देवी, साक्षात् सरस्वती, न भूतो न भविष्यति, राष्ट्रीय संस्कृति की राजदूत इत्यादि श्रद्धासूचक उपाधियों से प्रशंसनीया है। हमारे राष्ट्र की विशिष्ट विभूति अब हमारे बीच नहीं है किन्तु उनके द्वारा गाए जाने वाले हजारों गीतों की मधुर आवाज युगों-युगों तक जनमन को तृप्ति प्रदान करती रहेगी।

**पूर्व संस्कृत-विभागाध्यक्षा,**

**लाल बहादुर शास्त्री कॉलेज, जयपुर**

आयुर्वेद-स्तम्भः

# सेवेतोष्णं विधानेन

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**हेमन्ते शिशिरे च सामान्यतया गुरुस्निग्धात्मकानि द्रव्याणि सेवन्ते जनाः तेनाहारविशेषेण काल-प्रभावाच्च तस्मिन् काले श्लेष्मणः सञ्चयो भवति देहिनाम्। वसन्तपूर्वकाले तु निचितः स श्लेष्मा दिनकृद्भाभिरीरितः कायनिर्वर्तकमग्निं जाठरं बाधते, ततोऽग्निवधानन्तरं बहवः रोगाः जायन्ते। तस्माद्वसन्ते वमनप्रधानानि कर्माणि कारयेद् वैद्यः। शिरोविरेचनं तु कफजयार्थं कर्तव्यमेव भिषङ्निर्देशेन।**

हेमन्त में एवं शिशिर ऋतु में सामान्यतया लोग गुरुस्निग्धात्मक द्रव्यों का सेवन करते हैं, जिसके कारण आहारविशेष से तथा काल के प्रभाव से उस काल में श्लेष्मा का सञ्चय देहधारियों में होता है। वसन्त के पूर्व काल में तो संचित वह श्लेष्मा सूर्य की किरणों से प्रेरित (विलायित) होता हुआ काय का निर्वर्तन (संपन्न) करने वाली जाठराग्नि को बाधित करता है , उससे अग्नि का वध (नाश, अग्निमांद्य) होकर अनेक रोग हो जाते हैं । इसलिए वसन्त ऋतु में वमनप्रधान कर्मों को वैद्य करवावे। कफ को जीतने के लिए शिरोविरेचन तो वैद्य के निर्देश से करवाया ही जाना चाहिए।

**वसन्तशब्देन वमनं प्रति चैत्र एव बोद्धव्यः; येन, दोषचयाद्यर्थं पञ्चकर्मप्रवृत्त्यर्थं चाभिधातव्य-प्रावृडाद्यृतुक्रमेण फाल्गुनचैत्रौ वसन्तो भवति, न वैशाखः। हेमन्ते श्लेष्मचयो भवति। अत एव कालेऽस्मिन् गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत्, व्यायामोद्वर्तनमायुर्वेदोक्तमौषधात्मकं धूमं कवलग्रहमपि च विधेयं वैद्यस्य परामर्शेन। कुसुमागमे तु सुखाम्बुना शौचविधिं शीलयेत्।**

वसन्त शब्द से वमन के लिए चैत्र मास ही जानना चाहिए, जिससे दोष के सञ्चय इत्यादि के लिए पञ्चकर्म की प्रवृत्ति के लिए किए जाने वाले प्रावृट् इत्यादि ऋतुक्रम के अनुसार फाल्गुन एवं चैत्र ही वसन्त माना जाता है वैशाख नहीं माना जाता है। हेमन्त में श्लेष्मा का सञ्चय होता है, अतः इस काल में गुरु, अम्ल, स्निग्ध एवं मधुर द्रव्यों को तथा दिवास्वप्न को वर्जित कर देना चाहिए। व्यायाम, उद्वर्तन एवं आयुर्वेदोक्त औषधिस्वरूपक धूम का प्रयोग तथा कवलग्रह (मुख में द्रव्यविशेष को ग्रास के रूप में धारण करना) भी वैद्य के परामर्श से करना चाहिए। वसन्त के आगमन पर तो सुखोष्ण जल से शौचविधि (स्नान-प्रक्षालन आदि) की जानी चाहिए।

**सामान्यतया वसन्ते त्वेककालं द्विकालं वोष्णजल-सेवनमप्युचितम्। यदि चेत् कालप्रभावादन-वधानाच्च ज्वरः सञ्जायते तदा त्वधिकवारमप्युष्ण-जलसेवनं समुचितम्, यतो हि ज्वरितेभ्यः पानीयमुष्णं प्रयच्छन्ति भिषजो भूयिष्ठं न तथा शीतम्, अस्ति च शीतसाध्योऽपि धातुर्ज्वरकर इति। (पुनरपि ज्वर उष्णमेव जलं हितकरं भवति)।**

सामान्यतया वसन्त में तो एक बार या दो बार उष्ण जल का सेवन करना उपयुक्त रहता है। यदि काल के प्रभाव से

अथवा असावधानी के कारण ज्वर उत्पन्न हो जाता है तो अधिक बार भी उष्ण जल का सेवन करना उपयुक्त रहता है, क्योंकि ज्वर से पीड़ित व्यक्तियों के लिए चिकित्सक विशेष रूप से उष्ण जल ही देते हैं शीतल जल नहीं देते हैं। यद्यपि ज्वर को उत्पन्न करने वाला धातु (दोष पित्त) शीतसाध्य होता है (फिर भी ज्वर में उष्ण जल ही हितकर होता है)।

**महर्षिणा चरकेण ज्वरनिवारणार्थमेका विशिष्टा व्यवस्था निर्दिष्टा, सः निर्दिशति यत् केनचिदपि ज्वरेण ग्रस्ताय रोगिणे पानीयमुष्णं दातव्यम् (ज्वरितस्य कायसमुत्थानदेशकालानभिसमीक्ष्य पाचनार्थं पानीयमुष्णं प्रयच्छन्ति भिषजः- चरकसंहिता)। महर्षेः सिद्धान्तानुरूपमस्मिन् 'कोरोना-सङ्क्रमणक्रमे' रोगस्यापवारणार्थमथवा रोगोत्पत्त्यनन्तरं किञ्चित् कालपर्यन्तमेव पानीयमुष्णं परमोपयोग्यस्ति। अतः ज्वरकाले तु पुनः पुनः पानीयमुष्णमेव पिबेज्जनः। यतो हि ज्वरो ह्यामाशयसमुत्थः, प्रायो भेषजानि चामाशय-समुत्थानां विकाराणां पाचनवमनापतर्पणसमर्थानि भवन्ति; पाचनार्थं च पानीयमुष्णं, तस्मादेतज्ज्व-रितेभ्यः प्रयच्छन्ति भिषजो भूयिष्ठम्। तद्धि तेषां पीतं वातमनुलोमयति, अग्निं चौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, श्लेष्माणं परिशोषयति, स्वल्पमपि च पीतं तृष्णाप्रशमनायोपकल्पते।**

महर्षि चरक ने ज्वर के निवारण के लिए एक विशिष्ट व्यवस्था निर्दिष्ट की है, वे कहते हैं कि किसी भी प्रकार के ज्वर से ग्रस्त रोगी के लिए उष्ण जल देना चाहिए (ज्वर से पीड़ित व्यक्ति के शरीर, हेतु, देश एवं काल को अच्छी प्रकार से देख कर पाचन के लिए चिकित्सक उष्ण जल देते हैं -चरकसंहिता)। महर्षि के सिद्धांत के अनुरूप इस कोरोना के संक्रमण के क्रम में रोग के अपहरण के लिए अथवा रोग की उत्पत्ति के बाद में कुछ काल तक ही उष्ण जल परम उपयोगी है। अतः ज्वरकाल में तो बार-बार उष्ण जल व्यक्ति को पीना चाहिए क्योंकि ज्वर आमाशयसमुत्थ व्याधि है। प्रायः आमाशयसमुत्थ विकारों के लिए औषधियाँ पाचन, वमन एवं अपतर्पण में समर्थ होती हैं। पाचन के लिए उष्ण पानी प्रयुक्त किया जाना चाहिए, इसीलिए ज्वर से पीड़ित व्यक्तियों के लिए चिकित्सक विशेष रूप से उष्ण जल देते हैं। निश्चित रूप से वह उन रोगियों के द्वारा पीने पर वात का अनुलोमन करता है, उदरस्थ अग्नि का उदीरण करता है (अभिवृद्धि करता है), शीघ्र ही जीर्ण हो जाता है, श्लेष्मा का परिशोषण करता है, थोड़ा भी पीया हुआ यह उष्ण जल ज्वर में होने वाली तृष्णा के प्रशमन के लिए उपकल्पित (प्रयुक्त) किया जाता है।

**किन्तु यदि जनः ज्वरेण पीडितो नास्ति तर्ह्युष्णं जलं विशेषेण न सेवेत। कोरोनाव्याधितः भीताः जनाः पुनः पुनरुष्णस्य जलस्य सेवनङ्कुर्वन्ति न हि तदुचितम्। ज्वरग्रस्ते हि युक्तमपि चैतन्नात्यर्थो-त्सन्नपित्ते ज्वरे सदाहभ्रमप्रलापातिसारे वा प्रदेयम्, उष्णेन हि दाहभ्रमप्रलापातिसारा भूयोऽभिवर्धन्ते, शीतेन चोपशाम्यन्तीति। एतदतिरिक्तमप्यधिक-मुष्णजलसेवनमहितात्मकमेव भवति।**

किंतु यदि व्यक्ति ज्वर से पीड़ित नहीं है तो विशेष रूप से उष्ण जल का सेवन नहीं करना चाहिए। कोरोना व्याधि से

डरे हुए लोग बार-बार उष्ण जल का सेवन करते हैं, वह उपयुक्त नहीं है। ज्वरग्रस्त व्यक्ति में उपयोगी होते हुए भी अत्यधिक बढे हुए पित्तज ज्वर में तथा दाह, भ्रम, प्रलाप एवं अतिसार में यह नहीं देना चाहिए। उष्ण जल से निश्चित रूप से दाह, भ्रम, प्रलाप एवं अतिसार और अधिक बढ़ जाते हैं और शीतल जल से शान्त होते हैं। इसके अतिरिक्त भी उष्ण जल का अधिक सेवन अहित स्वरूप का ही होता है।

**हेमन्ते शिशिरे तूष्णवीर्यात्मकं भोजनमपि हितकरम्भवति, वसन्तेऽपि हितकरं तत् किन्त्ववधानतयैव सेवनीयम्। उष्णवीर्यात्मकानां द्रव्याणां सेवनं स्वल्पमात्रयैव करणीयम्, यतो हि कालप्रभावात् पर्यावरण उष्णत्वमभिवर्धते, सूर्यस्य गभस्तयश्चोष्णत्वं वितरन्ति। यद्यपि वसन्तेऽपि सद्यो विपक्वस्योष्णस्पर्शात्मकस्य भोजनस्य सेवनन्तु समुचितम्, तर्ह्यप्युष्णवीर्यात्मकन्त्ववधानतयैव सेवनीयम्। अत एव भोजनमुष्णमश्नीयात्; उष्णं हि भुज्यमानं स्वदते, श्लेष्माणं च परिह्रासयति तस्मादुष्णमश्नीयात्।**

हेमन्त में एवं शिशिर ऋतु में तो उष्ण वीर्य वाला भोजन भी हितकर होता है। वसन्त ऋतु में भी वह हितकर होता है किंतु सावधानी से ही सेवन करना चाहिए। उष्ण वीर्य वाले द्रव्यों का सेवन अल्प मात्रा में ही करना चाहिए, क्योंकि काल के प्रभाव से पर्यावरण में उष्णता की अभिवृद्धि हो जाती है। सूर्य की किरणें उष्णता प्रदान करती हैं। यद्यपि वसन्त में भी तत्काल पकाए गए ताजा उष्ण स्पर्श वाला वाले भोजन का सेवन तो उचित होता है फिर भी उष्णवीर्यात्मक भोजन तो सावधानी से ही सेवन करना चाहिए। भोजन उष्ण खावे, उष्ण खाया जाता हुआ भोजन स्वादिष्ट लगता है और श्लेष्मा का ह्रास करता है, इसलिए उष्ण भोजन करना चाहिए।

**वसन्तर्तौ तु कफजो ज्वरः, कासः श्वासश्च विशेषेण जायन्ते, अत एव व्याधिमोक्षानन्तरमप्यामाशयोरः-सम्बन्धिनां व्याधीनामनुबन्धरूपेण समुत्पत्तेः सम्भावना वर्तते। उरःसम्बन्धि-विकारेषु तु श्वासः कासश्च प्राधान्येन तत्र भवतः। श्वासरोगस्तु विशेषेण कष्टदायी वर्तते, यथा-**

**कामं प्राणहरा रोगा बहवो न तु ते तथा।**
**यथा श्वासश्च हिक्का च प्राणानाशु निकृन्ततः।।6।।**
**(च.चि. 17/6)**

वसन्त ऋतु में तो कफज ज्वर, कास एवं श्वास विशेष रूप से उत्पन्न होते हैं। इसलिए व्याधिमोक्ष के बाद भी आमाशय एवं उरःप्रदेश से सम्बन्धित व्याधियाँ अनुबंध रूप में उत्पन्न होने की संभावना रहती हैं। उदरसम्बन्धी विकारों में तो श्वास-कास प्रधान रूप से होते हैं। श्वासरोग तो विशेष रूप से कष्टदायी होता है, जैसे कि-

प्राणों का हरण करने वाले रोग अत्यधिक हैं लेकिन वे उस प्रकार से प्राणों को नष्ट नहीं करते हैं जिस प्रकार से श्वास एवं हिक्का शीघ्र ही प्राणों को नष्ट कर देते हैं।

**कोरोनाव्याधितः निर्मुक्तेषु तु वसन्तकाले विशेषेणा-वधानता वर्तनीया। यतो हि तेषां श्वसनसंस्थाने सः दौर्बल्यमावहति। अतः कासश्वासादीनामाक्रमणस्य सम्भावना वर्तते तेषु। आधुनिकाश्चिकित्सका अपि कथयन्ति यदस्मिन् व्याधौ Fibrosis इत्यस्य सम्भावना व्याधिकाले व्याध्यनन्तरञ्च विशेषेण वर्तते**

**यत्र हि फुफ्फुसयोः विशिष्टानां तन्तूनामेकत्रीभावः काठिन्यञ्च जायते।**

कोरोना व्याधि से मुक्त हुए व्यक्तियों में तो वसन्तकाल में विशेष रूपसे सावधानी रखनी चाहिए, क्योंकि उनके श्वसनसंस्थान में वह कोरोना दौर्बल्य प्राप्त करवा देता हैं, इसलिए कास-श्वास इत्यादि के आक्रमण की संभावना उन व्यक्तियों में होती है। आधुनिक चिकित्सक भी कहते हैं कि इस व्याधि में फाइब्रोसिस की संभावना व्याधि काल में और व्याधि के बाद में विशेष रूप से होती है जिसमें फुफ्फुसों में विशिष्ट तंतुओं का एकत्रीभाव और काठिन्य हो जाता है।

**उरःस्थस्य हृदयस्य रोगाणामपि सम्भावना वर्ततेऽस्मिन् रोगे। आमाशयसम्बन्धि-विकारेषु त्वग्निमान्द्याश्रद्धादयः रोगा भवन्ति। अत एव श्लेष्माणं पित्तदोषं तयोः स्थानानि चावेक्ष्योष्ण-वीर्याणां द्रव्याणां प्रयोगः श्रेयस्करो भवति। यानि ह्युष्णवीर्याणि द्रव्याणि श्लेष्मणश्छेदनङ्कृत्वा तन्निर्हरणङ्कुर्वन्ति तैस्तु पित्तवृद्धिर्न भवेदपि तु दीपनपाचनात्मकस्य पित्तांशस्य वृद्धिर्भवेदिति सम्यग् विचार्यैवोष्णद्रव्याणां प्रयोगः विधानेनाव-धानेन च करणीयः। द्रव्याणामुपसेव्यमानानामव-चयनन्तु स्वानुभूत्यनुरूपेण विशेषज्ञानाञ्च साहाय्येन करणीयम्।**

उरःस्थ रोगों की एवं हृदयरोगों की संभावना इस रोग में विशेष रूप से होती है। आमाशयसम्बन्धी विकारों में तो अग्निमांद्य, भोजन में अश्रद्धा इत्यादि रोग होते हैं, इसलिए श्लेष्मा को और पित्तदोष को तथा उनके स्थानों को ध्यान में रखकर उष्ण वीर्य द्रव्यों का प्रयोग श्रेयस्कर होता है जो उष्ण वीर्य द्रव्य श्लेष्मा का छेदन करके उसका निर्हरण करते हैं, उनके द्वारा पित्त की वृद्धि नहीं होती अपितु दीपन-पाचनात्मक पित्तांश की वृद्धि होती है। इस प्रकार से सम्यक् रूप से विचार करके उष्ण द्रव्यों का प्रयोग विधान से सावधानीपूर्वक करना चाहिए। सेवन किए जाने वाले द्रव्यों का चयन तो अपनी अनुभूति के अनुरूप तथा विशेषज्ञ व्यक्तियों की सहायता से ही करना चाहिए।

**वसन्ते सेवनीयानां केषाञ्चिदुपयोगिद्रव्याणां योगानामौषधीनाञ्च संक्षेपेणोल्लेखोऽत्र क्रियते, एतेषां सेवनं श्लेष्मापहारकमग्निवृद्धिकरं सुखदं हितावहञ्च भवति। यथा-**

- **वचाचित्रकशुण्ठीमरिचपिप्पलीश्च सममात्रायां गृहीत्वा चूर्णं करणीयम्। तस्य चूर्णस्यैक-ग्राममात्रात्मकस्य सेवनङ्करणीयं स्वस्थेन जनेन पञ्च दिनपर्यन्तमेव कफजनितानां रोगाणां परिहारार्थं वसन्ते। ये हि ज्वरश्वासकासार्दिताः सन्ति तैस्त्वधिककालपर्यन्तमपि सेवनीयमेतत्, किन्तु तदपि विंशतिदिनपर्यन्तमेव, ततस्तु भिषक् परामर्शः समुचितः।**
- **पिप्पलीमेकां पयसि शृतां भक्षयेद्रात्रौ स्वस्थेनापि जनेन दुग्धञ्चानुपेयं दश दिनानि यावत् ततस्तु परिवर्ज्यो ह्येषः प्रयोगः।**
- **वसन्ते पिण्डखर्जूराणि सेवनीयानि पञ्चष-सङ्ख्यात्मकान्येव।**
- **लवङ्गकलिकैका चपला चाप्येका गोस्तन्यश्च चतस्त्रः सुलभाः ग्राम्याश्च सुरसाः पञ्चपत्र-**

**सङ्ख्याकाः पिचुमर्दस्य संवर्तिका अपि पञ्चैव वेल्लजन्तु त्रिसङ्ख्यात्मकमेव गृहीत्वा दृषदि सुष्ठु पेषयित्वा किञ्चिदुष्णं कृत्वा सायं प्रातश्च लिह्यात् स्वस्थो जनः केनचिद्रोगेण रुग्णोऽपि वा। वसन्तेऽग्निवर्धकः कफक्षयकारकः रुच्यश्चायं प्रयोगः, ज्वरे श्वासे कासे हिक्कायाञ्च विशेषेण फलदः।**

- **अञ्जीरफलमेकन्तु प्रतिदिनमेव भक्षणीयं वसन्ते।**
- **भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्।**
- **पञ्चग्रामपरिमितमार्द्रकमार्द्रा च हरिद्रापि तत्सममेव गृहीत्वा संक्षोद्यामलकस्यैकस्य खण्डानि सम्मेल्य शर्करां लवणं वाऽवचूर्ण्य समश्नीयात् भोजनेन सहैव केवलं वसन्ते।**

वसन्त ऋतु में सेवन करने योग्य कुछ उपयोगी द्रव्यों का, योगों का एवं औषधियों का संक्षेप में यहां उल्लेख किया जा रहा है । इनका सेवन श्लेष्मा को दूर करने वाला, अग्नि की वृद्धि करने वाला, सुखदायी और हितकारक होता है, जैसे-

- वचा, चित्रक, शुण्ठी, मरिच एवं पिप्पली को समान मात्रा में लेकर चूर्ण कर लेना चाहिए। इस चूर्ण का 1 ग्राम की मात्रा में स्वस्थ व्यक्ति के द्वारा कफ से उत्पन्न होने वाले रोगों के परिहार के लिए वसन्त ऋतु में 5 दिन तक ही किया जाना चाहिए। जो व्यक्ति ज्वर, श्वास एवं कास से पीड़ित हैं उनके द्वारा तो अधिक समय तक भी यह सेवन करने योग्य है, किंतु वह भी 20 दिन तक ही करना चाहिए, उसके बाद तो चिकित्सक का परामर्श लेना उपयुक्त होता है।
- एक पिप्पली दूध में उबालकर रात्रि में स्वस्थ व्यक्ति के द्वारा दुग्ध के अनुपान से 10 दिन तक लेनी चाहिए उसके बाद तो यह प्रयोग वर्जित है।
- वसन्त ऋतु में पिंडखजूर 5-6 की संख्या में सेवन किए जाने चाहिए।
- एक लवंग, एक पिप्पली, चार मुनक्का एवं सुलभ गांव में उत्पन्न होने वाली तुलसी 5 पत्रों की संख्या में तथा नीम के नए कोमल पत्ते भी 5 लेने चाहिए तथा काली मरिच संख्या में तीन लेकर पत्थर पर अच्छी प्रकार से पीसकर कुछ गर्म करके सायंकाल और प्रातःकाल स्वस्थ व्यक्ति चाटे अथवा किसी भी रोग से ग्रस्त रोगी भी इसको चाटे। वसन्त ऋतु में अग्निवर्धक और कफ का क्षय करने वाला रुचिकारक यह प्रयोग है। ज्वर में, श्वास में, कास में और हिक्का में विशेष रूप से फलदायी है।
- एक अंजीर का फल प्रतिदिन ही वसन्त ऋतु में खाना चाहिए।
- भोजन के पहले नमक मिली हुई अदरक का भक्षण करना सर्वदा ही पथ्य होता है।
- 5 ग्राम की मात्रा में अदरक एवं ताजा हरिद्रा भी इसी मात्रा में लेकर इनको कूटकर एक आंवले के टुकड़े भी इसमें मिलाकर शक्कर अथवा लवण को इसके ऊपर अवचूर्णित करके (बुरका कर) भोजन के साथ ही केवल वसन्त ऋतु में सेवन करना चाहिए।

# संस्कृत-समाचाराः



कला-संस्कृति-संस्कृतशिक्षामन्त्रिणां श्रीमतां बुलाकीदासकल्लमहोदयानां मुख्यातिथित्वे राजस्थान-संस्कृत-अकादमी- द्वारा जयपुरस्थे जवाहरकलाकेन्द्रे 27.02.2022 दिनाङ्के **'राष्ट्रियसंस्कृतकविसम्मेलनम्'** आयोजितम्। अत्रैव बीकानेर- निवासिनां राष्ट्रपति-सम्मानितानां दिवंगतानां **डॉ.पुष्करदत्तशर्मा** -महोदयानां स्मृतौ सश्रीफलोत्तरीयेण एकविंशतिसहस्ररूप्यकात्मकेन **'प्रज्ञालङ्करणम्'** इति सम्मानेन जयपुरस्थः संस्कृतविद्वान् **प्रो. ताराशङ्कर शर्मा** - महोदयः सम्मानितः। पुरस्कारोऽयं डॉ. पुष्करदत्तशर्मणां परिवारेण प्रदत्तः। इतः प्राक् बीकानेरस्थाः प्रो. महावीरप्रसाद-सारस्वताः 'डॉ. पुष्करदत्तशर्मणां व्यक्तित्वं कृतित्वञ्च' इतिविषयकं सारगर्भितमेकं व्याख्यानमपि प्रदत्तवन्तः। अस्मिन्नवसरे डॉ. पुष्करदत्तशर्मणां पौत्री श्रीमती **शिप्रा शर्मा** R.A.S., पौत्रश्च **डॉ. मयंक शर्मा** उपस्थितौ आस्ताम्।


## पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्
### पत्रकम् 4 ( नियम : 8 )

| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | - जयपुरम् |
| 2. | प्रकाशने कालावधिः | - मासिकपत्रम् |
| 3. | मुद्रकस्य नाम | - द्वारा - न्यू जय शिवा प्रिन्टर्स |
| | नागरिकता, संकेतः | - भारतीयः, गोपालबाड़ी, जयपुरम् |
| 4. | प्रकाशकस्य नाम | - माणकचन्दमाहेश्वरी |
| | नागरिकता, संकेतः | - भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 5. | सम्पादकस्य नाम | - प्रोफेसर श्रीकृष्णशर्मा |
| | नागरिकता, संकेतः | - भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 6. | पत्रस्य संपत्तेः अधिकारस्यांशभाजां वा जनानां संस्थाया वा नामसंकेतः | - ''भारतीय-संस्कृत-प्रचार-संस्थान राजस्थान जयपुर'' |

अहं माणकचन्द माहेश्वरी घोषयामि यद् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनांक : 01-03-2022

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

ए इन्फ्रास्ट्रक्चर लिमिटेड

एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज
एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites : www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-110055
फोन : 011-47642000, 01, 02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,